अष्टमी कक्षा

## सम्पूर्ण–संस्कृतम्

# आमोदः



# भारताचे संविधान

## भाग ४ क

## नागरिकांची मूलभूत कर्तव्ये

**अनुच्छेद ५१ क**

**मूलभूत कर्तव्ये – प्रत्येक भारतीय नागरिकाचे हे कर्तव्य असेल की त्याने –**

(क) प्रत्येक नागरिकाने संविधानाचे पालन करावे. संविधानातील आदर्शांचा, राष्ट्रध्वज व राष्ट्रगीताचा आदर करावा.

(ख) स्वातंत्र्याच्या चळवळीला प्रेरणा देणाऱ्या आदर्शांचे पालन करावे.

(ग) देशाचे सार्वभौमत्व, एकता व अखंडत्व सुरक्षित ठेवण्यासाठी प्रयत्नशील असावे.

(घ) आपल्या देशाचे रक्षण करावे, देशाची सेवा करावी.

(ङ) सर्व प्रकारचे भेद विसरून एकोपा वाढवावा व बंधुत्वाची भावना जोपासावी. स्त्रियांच्या प्रतिष्ठेला कमीपणा आणतील अशा प्रथांचा त्याग करावा.

(च) आपल्या संमिश्र संस्कृतीच्या वारशाचे जतन करावे.

(छ) नैसर्गिक पर्यावरणाचे जतन करावे. सजीव प्राण्यांबद्दल दयाबुद्धी बाळगावी.

(ज) वैज्ञानिक दृष्टी, मानवतावाद आणि जिज्ञासूवृत्ती अंगी बाळगावी.

(झ) सार्वजनिक मालमत्तेचे जतन करावे. हिंसेचा त्याग करावा.

(ञ) देशाची उत्तरोत्तर प्रगती होण्यासाठी व्यक्तिगत व सामूहिक कार्यात उच्चत्वाची पातळी गाठण्याचा प्रयत्न करावा.

(ट) ६ ते १४ वयोगटातील आपल्या पाल्यांना पालकांनी शिक्षणाच्या संधी उपलब्ध करून द्याव्यात.


### अष्टमी कक्षा

## सम्पूर्ण–संस्कृतम्

# आमोदः

(मराठी, गुजराती, हिन्दी, इंग्रजी इत्यादीनां माध्यमानां कृते)

महाराष्ट्रराज्य–पाठ्यपुस्तक–निर्मितिः तथा
अभ्यासक्रम–संशोधन–मण्डलम्, पुणे–४



‘स्मार्टफोन’ इति उपकरणेन ‘दीक्षा ॲप’ द्वारा पाठ्यपुस्तकस्य प्रथमपृष्ठे योजितेन Q. R. Code माध्यमेन (PDF) पाठ्यपुस्तकं द्रष्टुं शक्यते । पाठ्यपुस्तके प्रतिपाठं योजितेन Q. R. Code साहाय्येन दृक्श्राव्य–अध्ययन–अध्यापनसाहित्यम् उपलभ्यते ।

अभ्यास–२११६/(प्र.क्र.४३/१६) एसडी–४ दिनाङ्कः–२५.४.२०१६ इत्यमुं शासननिर्णयक्रमाङ्कम् अनुसृत्य स्थापितायाः समन्वयसमित्याः उपवेशने ३.३.२०१७ दिने इदं पुस्तकम् अनुमानितम् ।

**प्रथमावृत्तिः - २०१७**
**पञ्चमं पुनर्मुद्रणम् - २०२२**

© महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलम्, पुणे - ४११ ००४.
अस्य पुस्तकस्य सर्वे अधिकाराः महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सन्ति। महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सञ्चालकस्य लिखित-अनुमतिं विना अस्य पुस्तकस्य कमपि भागं उद्धृतं कर्तुं न शक्यते ।

**संस्कृतभाषातज्ज्ञसमितिः**
पं. गुलाम दस्तगीर बिराजदार (अध्यक्षः)
श्रीमती तरङ्गिणी खोत
डॉ. माधव केळकर
डॉ. माधव भुस्कुटे
डॉ. प्रज्ञा देशपाण्डे
श्रीमती सविता वायळ (सदस्य-सचिव)

**संस्कृतभाषाभ्यासगणसदस्याः**
डॉ. माधवी जोशी
डॉ. प्रसाद भिडे
डॉ. प्रसाद कुलकर्णी
श्री. जगदीश इन्दलकर
श्रीमती अदिती माधवन्
श्रीमती विज्ञापना गोकर्णकर
श्रीमती ऋचा वैद्य
श्रीमती काञ्चन जोशी
श्रीमती शेवन्ती दाङ्गट
डॉ. माधवी नरसाळे
श्रीमती स्वाती जाधव
श्रीमती अर्चना जोशी

**संयोजनम्** :
श्रीमती सविता अनिल वायळ
विशेषाधिकारी, मराठी

**चित्रकारः** :
फारुख नदाफ

**मुखपृष्ठम्** :
फारुख नदाफ

**अक्षरयोजनम्** :
भाषाविभागः
पाठ्यपुस्तकमण्डलम्, पुणे.

**निर्मितिः** :
सच्चिदानंद आफळे,
मुख्य निर्मिति अधिकारी
संदीप आजगांवकर,
निर्मिति अधिकारी

**कागदम्**:70 GSM CREAM WOVE

**मुद्रणादेशः**: N/PB/2022-23/
**मुद्रकः**:M/s

**प्रकाशकः**
**विवेक उत्तम गोसावी**
नियन्त्रकः
पाठ्यपुस्तकनिर्मितिमण्डलम्,
प्रभादेवी, मुंबई - २५.

## प्रस्तावना

आत्मीयाः छात्राः,

संस्कृतभाषा नाम अस्माकं भारतीयसाहित्यस्य, संस्कृतेः, ज्ञानभाण्डारस्य कुञ्चिका एव । वस्तुतः संस्कृतभाषा नैव अपरिचिता युष्माकम् । यतः कतिचन भारतीयभाषासु व्यवहारे विद्यमानाः बहवः शब्दाः संस्कृतोद्भवाः एव । इतःपरं शास्त्रशुद्धपद्धत्या अध्ययनस्य प्रारम्भः भवेत् । 'यया भाष्यते सा भाषा' अतः सम्भाषणेन एव भाषाध्ययनस्य आरम्भः भवति । तदनुसारम् अस्य अभ्यासक्रमस्य रचना कृता । पुस्तकेऽस्मिन् चित्रमयाः कथाः, गीतानि संवादाश्च सन्ति । तेषामाधारेण वाक्यरचनां कर्तुं प्रयत्नः विधेयः । यद् यत् पठितं तस्य तस्य प्रयोगं भाषणे, लेखने, पठने च उत्साहेन कुरुत । पाठ्यपुस्तके यावदस्ति तावन्मात्रं संस्कृतं न। परीक्षानिमित्तं यद् अध्ययनं क्रियते तावन्मात्रं ज्ञानं न । भाषा तु अस्माकं जीवनम् अभिव्याप्य तिष्ठति । अतः भाषाध्ययनं निरन्तरं भवेत् । तदर्थं शिक्षकाः, पालकाः, सहपाठिनः, आन्तरजालपत्राणि (Websites), चलभाष-उपयोजनानि (MobileApps) साहाय्यभूतानि भविष्यन्ति । सर्वदा स्मरत !

**यः पठति लिखति पश्यति परिपृच्छति पण्डितानुपाश्रयति ।**
**तस्य दिवाकरकिरणैः नलिनीदलमिव विकास्यते बुद्धिः॥**

कण्ठस्थीकरणं, नियमबद्धता स्पष्टोच्चारणं च संस्कृताध्ययनस्य वैशिष्ट्यम्। अतः एव सा संस्कृता भाषा । कण्ठस्थीकरणं नाम अज्ञात्वा रटनं न । अल्पकालेन दोषरहितां भाषां ज्ञातुं तद् उपयुक्तम्। कण्ठस्थीकरणेन उच्चारणं शुद्धं भवति, स्मरणं च वर्धते । पुस्तकस्था विद्या यदि मस्तकस्था भवति तर्हि पुस्तकावलम्बित्वं क्रमशः समाप्तं भवति । युष्माकं भाषाप्रवेशः **आमोदकरः** स्यात् इति आशासे।



**(डॉ. सुनिल मगर)**
सञ्चालकः
महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा
अभ्यासक्रमसंशोधनमण्डलम्, पुणे.

पुणे
दिनांकः - २८ मार्च, २०१७, गुढीपाडवा
भारतीय सौर : ७ चैत्र १९३९

# भारतस्य संविधानम्

## प्रस्तावना

वयं, भारतस्य जनाः, भारतं सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादिनं, सम्प्रदायनिरपेक्षं, लोकतन्त्रात्मकं गणराज्यं विधातुं, तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च न्यायं,<br>
विचारस्य, अभिव्यक्तेः, आस्थायाः, धर्मस्य,<br>
उपासनायाश्च स्वतन्त्रतां,<br>
प्रतिष्ठायाः, अवसरस्य च समतां प्रापयितुं;<br>
तेषु सर्वेषु च<br>
व्यक्तिगौरवस्य राष्ट्रस्य एकतायाः,<br>
अखण्डतायाश्च सुनिश्चायिकां बन्धुतां<br>
वर्धयितुं;

कृतदृढसङ्कल्पाः अस्याम् अस्मदीयायां संविधानसभायाम्

अद्य, ख्रिस्तीये १९४९ तमे वर्षे नवम्बरमासस्य २६-तमे दिने (२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ) एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्, आत्मार्पितं च कुर्महे ।

## राष्ट्रगीतम्

जनगणमन–अधिनायक जय हे
भारत–भाग्यविधाता ।
पंजाब, सिंधु, गुजरात, मराठा,
द्राविड, उत्कल, बंग,
विंध्य, हिमाचल, यमुना, गंगा,
उच्छल जलधितरंग,
तव शुभ नामे जागे, तव शुभ आशिस मागे,
गाहे तव जयगाथा,
जनगण मंगलदायक जय हे,
भारत–भाग्यविधाता ।
जय हे, जय हे, जय हे,
जय जय जय, जय हे ।।

## प्रतिज्ञा

भारतो मम देशोऽयं भारतीयाश्च बान्धवा: ।
परानुरक्तिरस्मिन् मे देशेऽस्ति मम सर्वदा ।।१।।

समृद्धा विविधाश्चास्य या देशस्य परम्परा: ।
सन्ति ता: प्रति मे नित्यमभिमानोन्नतं शिर: ।।२।।

प्रयतिष्ये सदा चाहमासादयितुमर्हताम् ।
येन तासां भविष्यामि श्रद्धायुक्त: पदानुग: ।।३।।

संमानयेयं पितरौ वयोज्येष्ठान् गुरूंस्तथा ।
सौजन्येनैव वर्तेय तथा सर्वैरहं सदा ।।४।।

स्वकीयेन हि देशेन स्वदेशीयैश्च बान्धवै: ।
एकान्तनिष्ठमाचारं प्रतिजाने हि सर्वथा ।।५।।

एतेषामेव कल्याणे समुत्कर्षे तथैव च ।
नूनं विनिहितं सर्वं सौख्यमात्यन्तिकं मम ।।६।।

# संस्कृतम् ।

**अष्टमीकक्षाछात्राणां संस्कृतभाषाविषये अध्ययननिष्पत्तिः ।**

| क्षेत्रम् | अध्ययननिष्पत्तिः । |
|---|---|
| **श्रवणम्** | 08.27.1 संस्कृतवर्णमाला, वर्णानाम् उच्चारणस्थानानि, स्वराणां ह्रस्वदीर्घौ भेदौ अवगच्छति।<br>08.27.2 संस्कृतभाषा तथा मातृभाषा अनयोः साम्यस्थलानि अवगच्छति।<br>08.27.3 शिक्षकेण दत्ताः सुगमसूचनाः श्रुणोति ।<br>08.27.4 ध्वनिमुद्रितसंस्कृतगीतानि संस्कृतसंवादान् च श्रुणोति । |
| **भाषणम्** | 08.27.5 छन्दः अनुसृत्य श्लोकान् पठति ।<br>08.27.6 गीतानि सम्यक् गायति ।<br>08.27.7 संस्कृतमाध्यमेन एकपदेन उत्तरति ।<br>08.27.8 शिक्षकेण पृष्टानां प्रश्नानां संस्कृतमाध्यमेन उत्तराणि वदति ।<br>08.27.9 संस्कृतमाध्यमेन शुभाशंसनम् वदति । |
| **पठनम्** | 08.27.10 मुद्रितपाठे संस्कृतवर्णोच्चारणवैशिष्ट्यानि अनुसृत्य पठति ।<br>08.27.11 संस्कृतपाठम् आशयमनुसृत्य पठति ।<br>08.27.12 आन्तरजाले वर्तमानं पूरकसाहित्यं पठति / श्रुणोति च ।<br>08.27.13 ख्यातानि संस्कृतबोधवाक्यानि, प्रचलितान् श्लोकान् च पठति । |
| **लेखनम्** | 08.27.14 दोषविरहितम् अनुलिखति ।<br>08.27.15 अनुस्वारः तथा ह्रस्वदीर्घौ आदिविषयकान् लेखननियमान् अनुसृत्य लघुवाक्यानि रचयति ।<br>08.27.16 उत्तराणि संस्कृतमाध्यमेन लिखति ।<br>08.27.17 कमपि विषयम् अनुसृत्य संस्कृतमाध्यमेन किञ्चित् लिखति । |
| **अध्ययनम्** | 08.27.18 संस्कृतशब्दकोषस्य वर्णक्रमम् अनुसृत्य अभ्यासं प्रयोगं च करोति ।<br>08.27.19 संस्कृतविनोदकणिकानाम् आस्वादं करोति ।<br>08.27.20 अधीतसंस्कृतशब्दानां सम्भाषणे प्रयोगं करोति ।<br>08.27.21 कथाश्लोकादिषु अन्तर्भूतानि मूल्यानि वर्तमानौचित्यम् च अवगच्छति ।<br>08.27.22 पञ्चतन्त्रं, हितोपदेशः आदिषु वर्तमानानां कथासुभाषितानां सङ्ग्रहं करोति ।<br>08.27.23 व्यवहारे संस्कृतमाध्यमेन किञ्चित् सम्भाषते ।<br>08.27.24 अमरकोषस्य परिचयं प्राप्नोति । |
| **भाषाभ्यासः** | 08.27.25 आधुनिकभारतीयभाषासु प्रचलितान् तत्समसंस्कृतशब्दान् अभिजानाति ।<br>08.27.26 शब्दस्य प्रातिपदिकधात्वादिमूलरूपं तथा रूपवैविध्यं जानाति ।<br>08.27.27 लिङ्गं, पुरुषः, वचनं, विशेषणं, कालः इत्यादयः भाषिकसङ्कल्पनाः अवगच्छति ।<br>08.27.28 अनुवर्तिनं व्यञ्जनम् अनुसृत्य अनुस्वारलेखने तथा उच्चारणे यद् परिवर्तनं भवति तद् जानाति ।<br>08.27.29 व्यञ्जनान्तानां तथा स्वरान्तानां शब्दानां भेदम् अवगच्छति ।<br>08.27.30 लकारादिपाणिनीयसंज्ञानां परिचयं प्राप्नोति प्रयोगं च करोति । लट् (वर्तमानकालः), लङ् (भूतकालः) इ.<br>08.27.31 एकतः पञ्चाशत्पर्यन्तं (१-५०) सङ्ख्याः वदति । |

**पाठ्यपुस्तकस्य अपेक्षितपरिणामार्थं सर्वासां क्षमतानां सुयोग्यविकासार्थं प्रतिसप्ताहं षट् (६) तासिकाः अपेक्षिताः ।**

# अनुक्रमणिका

## प्रथमः घटकः


| अ.क्र. | पाठः | पृ. क्र. |
|---|---|---|
| * | चित्रपदकोषः । | १ |
| १. | परिचयः । | ४ |
| २. | कः, का, किम्? | ५ |
| ३. | के कुर्वन्ति? | ८ |
| ४. | द्वौ, द्वे, द्वे । | १० |
| ५. | अहं, त्वम् । | १२ |
| ६. | सङ्ख्याः । | १४ |
| * | श्रवणाभ्यासः । | १५ |
| * | भाषासूत्रम् १ । | १६ |
| * | वर्गपरीक्षा ।<br>(कृतिपत्रिका) | १९ |


## द्वितीयः घटकः


| अ.क्र. | पाठः | पृ. क्र. |
|---|---|---|
| ७. | वर्णानां संवादः । | २० |
| ८. | ८.१ सम्बन्धवाचकाः । | २२ |
| | ८.२ कुत्र अस्ति? | २४ |
| | ८.३ सहायकाः । | २५ |
| | ८.४ किम्? किम्? | २७ |
| | ८.५ कस्मै? कस्यै? | २८ |
| | ८.६ कस्मात् स्थानात्? | २९ |
| | ८.७ सम्बोधनम् । | ३० |
| ९. | विभक्तिमाला । | ३१ |
| १०. | मम शिक्षिका । | ३४ |
| * | भाषासूत्रम् २ । | ३५ |


## तृतीयः घटकः


| अ.क्र. | पाठः | पृ. क्र. |
|---|---|---|
| ११. | क्रियापदस्य सहचराः । | ४० |
| १२. | आत्मनेपदीया । | ४२ |
| १३. | अश्वस्य स्वामिनिष्ठा । | ४५ |
| १४. | संवादकौशलम् । | ४६ |
| १५. | आधुनिकप्रहेलिकाः । | ४८ |
| * | लेखनकौशलम् ।<br>(निबन्धाः, अनुवादाः ।) | ५० |
| * | भाषासूत्रम् ३ । | ५१ |


## चतुर्थः घटकः


| अ.क्र. | पाठः | पृ. क्र. |
|---|---|---|
| १६. | समानमस्तु भोजनम् । | ५६ |
| १७. | सूक्तिसुधा । | ५८ |
| १८. | उपकारस्य स्मरणम् । | ६० |
| १९. | राष्ट्रभक्तिः । | ६२ |
| * | लेखनकौशलम् । (चित्रवर्णनम् ।) | ६३ |
| * | भाषासूत्रम् - ४ । | ६४ |
| * | वर्णमाला - लेखनम्, उच्चारणम् । | ७० |
| * | अकारादिक्रमेण धातुकोषः । | ७२ |
| * | अकारादिक्रमेण शब्दकोषः । | ७४ |
| * | अमरकोषः । | ७५ |
| * | मूल्यमापनम् ।<br>(उपक्रमाः तथा प्रकल्पाः ।) | ७६ |
| * | सत्रान्त-परीक्षा-प्रारूपम् । | ७७ |
| * | कृतिपत्रिका-द्वितीयसत्रम् । | ७८ |

# प्रार्थना (केवलं कण्ठस्थीकरणार्थम्)

वक्रतुण्ड महाकाय
सूर्यकोटिसमप्रभ ।
निर्विघ्नं कुरु मे देव
सर्वकार्येषु सर्वदा ।।१।।





नमामि शारदां देवीं
वीणापुस्तकधारिणीम् ।
विद्यारम्भं करिष्यामि
प्रसन्ना भव सर्वदा ।।२।।

गुरुर्ब्रह्मा गुरुर्विष्णु:
गुरुर्देवो महेश्वर: ।
गुरु: साक्षात् परब्रह्म
तस्मै श्रीगुरवे नम: ।।३।।



संस्कृतं ये प्रशंसन्ति ये प्रशंसन्ति संस्कृतिम् ।
स्वदेशं ये च शंसन्ति धन्यं जीवन्ति ते नरा: ।।४।।

**शिक्षकेण अवधातव्या: अंशा: ।**

शिक्षकस्य पठनं स्पष्टं भवेत् । प्रारम्भस्तरे यथा एकैकस्य शब्दस्य उच्चारणं स्पष्टं भवेत् तथा शनै: शनै: सावधानतया शिक्षक: वाचनं कुर्यात् । तत् श्रुत्वा यदा छात्रा: अनुकरणं करिष्यन्ति तदा छात्रान् उच्चारणं बोधयेत् । नूतनशब्दानां परिचयसमये आदौ स्पष्टोच्चारणं कृत्वा तदनन्तरम् अभिनयेन अर्थं बोधयेत् । श्लोकानां गीतानां पाठनसमये सुयोग्या गेयता भवेत् । धातुकोषस्य/शब्दकोषस्य उपयोगेन सदृशानि वाक्यानि वाचयेत् । स्वतन्त्ररचनां कर्तुं प्रेरयेत् । प्रारम्भस्तरे पठनदोषा: न गणनीया: । केवलं प्रयत्ना: प्रशंसनीया: ।



# पठत–बोधत ।



## • कः समयः ?

|  |  |  |  |  |
|---|---|---|---|---|
| एकवादनम् | द्विवादनम् | त्रिवादनम् | चतुर्वादनम् | पञ्चवादनम् |

## • बालकः कदा किं करोति ?



षड्वादने उत्तिष्ठति ।



सपादषड्वादने दन्तधावनं करोति ।



सार्धषड्वादने स्नानं करोति ।



पादोन–सप्तवादने दुग्धं पिबति ।





सप्तवादने अध्ययनं करोति ।



सार्धसप्तवादने गृहकार्यं करोति ।

• बालकः/बालिका कदा किं करोति ?







अष्टवादने प्रातराशं करोति ।



सार्ध–अष्टवादने गणवेशं धारयति ।



नववादने द्विचक्रिकया शालां गच्छति ।



दशवादने विद्यालये प्रार्थनां गायति ।



सार्धपञ्चवादनपर्यन्तं शालातः गृहम् आगच्छति ।

ह्यः ← अद्य → श्वः

प्रपरह्यः ← परह्यः ← ह्यः ← अद्य → श्वः → परश्वः → प्रपरश्वः

(शनिवासरः) (रविवासरः) (सोमवासरः) (मङ्गलवासरः) (बुधवासरः) (गुरुवासरः) (शुक्रवासरः)

तालिकां पूरयत ।

| | | | | | | |
|---|---|---|---|---|---|---|
| प्रपरह्यः | ______ | ह्यः | अद्य | श्वः | ______ | ______ |
| रविवासरः | सोमवासरः | ______ | बुधवासरः | ______ | शुक्रवासरः | ______ |

# चित्रपदकोषः ।


## फलानि



आम्रम्



द्राक्षा


कदली


सेवम्


कालिङ्गम्


मधुकर्कटी



नारङ्गम्


पनसम्


दाडिमम्

## पक्षिणः


काकः


चटका


शुकः


कपोतः


मयूरः



बकः


सारिका


श्येनः


हंसः

## वन्यपशवः




सिंहः



भल्लूकः



शशः



गजः




वृकः




व्याघ्रः


## मम लेखनवस्तूनि




मापिका



पुनःपूरणी



लेखनपुस्तिका



मार्जकः




लेखनी




स्यूतः


## कक्षावस्तूनि



व्यजनम्



वातायनम्




फलकम्



आसन्दः




उत्पीठिका




सुधाखण्डः

## पुष्पाणि


कमलम्


पाटलम्



जपाकुसुमम्



सूर्यपुष्पम्



सेवन्तिका


चम्पकम्

## ग्राम्यपशवः



धेनुः



महिषी


अजा


मेषः


गर्दभः


शुनकः


अश्वः


उष्ट्रः


मार्जारः

**क्रीडा –**

शीघ्रं कथयत, शीघ्रं कथयत ।
फलद्वयस्य नाम हि कथयत ।।
(फलद्वयस्य स्थाने पक्षिद्वयस्य, पुष्पद्वयस्य इति अन्यप्रकारैः अपि प्रष्टुं शक्यते ।)

# १. परिचयः ।

(प्रथमः घटकः)

अहं छात्रः ।
मम नाम राहुलः ।
मम माता विदुला ।
मम पिता सुरेश : ।



त्वं छात्रा ।
त्वं राधा ।





एषः अथर्वः ।



एषा रमा ।



सः दीपेशः ।



सा श्रेया ।

I5142Q

- **कृतिः– एवं सर्वे छात्राः स्वपरिचयं कथयन्ति । तथा स्वमित्रस्य नाम वदन्ति ।**

**गायत! नन्दत!**
**हस्तकुटुम्बम् ।**



एषः स्नेहालुः तातः ।
अस्य नाम खलु अङ्गुष्ठः ।।१।।

निकटे निवसति ननु माता ।
नाम तर्जनी तस्याः ।।२।।

ज्येष्ठा पुत्री दीर्घतमा ।
नाम मध्यमा तस्याः ।।३।।

तस्याः भगिनी मनोरमा ।
अस्ति ननु सा अनामिका ।।४।।

अन्ते भवति कनिष्ठबाला ।
तस्याः नाम कनिष्ठिका ।।५।।



हस्तद्वयेन प्रणमामि ।
आशीर्वादं विन्दामि ।।६।।



# २. कः, का, किम्?

## २.१ एषः/सः



एषः असीमः ।
एषः चलति ।
कः चलति?
एषः असीमः चलति ।



सः प्रसादः ।
सः धावति ।
कः धावति?
सः प्रसादः धावति ।



योगेशः धावति ।



अर्जुनः गच्छति ।



मेघः वर्षति ।



सिंहः गर्जति ।

• **कृति :-** छात्राः मञ्जूषाद्वयस्य साहाय्येन वाक्यानि वदन्ति ।

| |
|---|
| छात्रः, गिरीशः, सिंहः, मयूरः, काकः, गजः, मूषकः, शुनकः, शुकः, शिक्षकः बालकः, अश्वः, मर्कटः |

| |
|---|
| पठति, गच्छति, आगच्छति, लिखति, खादति, उपविशति, उत्तिष्ठति, पिबति, पश्यति, नृत्यति, खेलति, गायति, नमति, उत्पतति, वदति |

### भाषाभ्यासः


**चित्रं दृष्ट्वा वाक्यं लिखत ।**




______________



______________



______________



______________

## २.२ एषा/सा



एषा नीलिमा ।
एषा गायति ।
का गायति?
एषा नीलिमा गायति ।



सा स्वाती ।
सा नृत्यति ।
का नृत्यति?
सा स्वाती नृत्यति ।

• **कृतिः –** छात्रः स्वसमीपे/दूरे उपविष्टस्य मित्रस्य विषये वाक्यं वदति ।
यथा, एषः सुभाषः उपविशति । सः सङ्केतः हसति । एषा नीता लिखति । सा सुवर्णा चलति ।

**१. मञ्जूषाया: साहाय्येन वाक्यानि रचयत ।**

<table>
<tr><td>हरिण:, गायक:, नृप:, स:, एष:, क:,<br>अमित:, कपोत:, मार्जार:, शुक:, सिंह:</td><td>चटका, पिपीलिका, बालिका, विद्यार्थिनी,<br>महिला, मक्षिका, गीता, नदी, सा, एषा, का,<br>श्रेया, शिक्षिका</td></tr>
<tr><td colspan="2">वदति, पश्यति, पतति, हसति, खादति, पिबति, वसति, कथयति, नमति, वहति, गायति<br>चलति, उपविशति, क्षिपति, उत्तिष्ठति, तिष्ठति, गच्छति, आगच्छति, भ्रमति, गर्जति</td></tr>
</table>

**२. चित्रं दृष्ट्वा वाक्यं लिखत ।**

________ ________ ________ ________

**२.३ एतद्/तद्**



एतत् फलम् ।
एतत् पतति ।
किं पतति?
एतत् फलं पतति ।



तत् कमलम् ।
तत् विकसति ।
किं विकसति?
तत् कमलं विकसति ।

• **कृति:-** क्रियापदं योजयित्वा छात्रा: वाक्यानि वदन्ति ।

व्यजनम् ________ । अपत्यं ________ । जलम् ________ । रेलयानम् ________।

**क्रीडा-** शिक्षक: एकैकं शब्दं वदति । शब्दस्य लिङ्गं ज्ञात्वा छात्रा: क्रियां कुर्वन्ति ।
यथा- यदि पुंलिङ्गशब्द: तर्हि छात्रा: हस्तम् उपरि कुर्वन्ति,
यदि स्त्रीलिङ्गशब्द: तर्हि तालिकावादनम्,
यदि नपुंसकलिङ्गशब्द: तर्हि 'ॐ' इति ध्वनि: ।
शब्दा:- अश्व:, वृद्धा, पर्णम्, वृक्ष:, एष:, पेटिका, गगनम्, हस्त:, सा, चषक:, कूपी, तत्, वनम्, पात्रम्, नदी, एषा, स्थालिका, फलम्, यानम्, पुरुष:, एतत्, उदरम् ।

१. **योग्यस्तम्भेषु शब्दान् लिखत ।**

| शब्दा: | स: | सा | तत् |
|---|---|---|---|
| चन्द्र:, लता, पत्रम्, दुग्धम्, पादरक्षा, अश्व:, विमानम्, शाटिका, वृद्ध:, पेटिका, गृहम् | | | |

२. **प्रश्ननिर्माणं कुरुत । यथा– मृग: धावति । क: धावति ?**

१. छात्र: लिखति । २.फलं पतति । ३.बालिका गायति । ४. मर्कट: खादति । ५. एषा पश्यति ।

३. **तालिकात: शब्दान् चित्वा कथां पूरयत ।**



(भवति, पश्यति, क्षिपति, खिन्न:, काक:, पिबति, आगच्छति, भ्रमति)

एक: _______ अतीव तृषार्त: । स: अत्र-तत्र _______ । किन्तु जलं नास्ति । स: वने एकं घटं _______ । किन्तु घटे जलम् अल्पम् । स: _______भवति । स: घटस्य समीपे पाषाणखण्डान् पश्यति । स: एकैकं पाषाणखण्डं घटे_______ । तेन जलम् उपरि _______ । काक: जलं _______ सन्तुष्ट: च _______ ।


**पठत-बोधत**


**अत्र**


**तत्र**


**कुत्र**
?



I59Z4D

| | | | |
|---|---|---|---|
| शुनक: अत्र । | पर्वत: तत्र । | वायु: कुत्र ? | यानं कुत्र ? |
| बालिका अत्र । | वृक्ष: तत्र । | वायु: सर्वत्र । | यानम् अत्र नास्ति, |
| कन्दुक: कुत्र ? | नदी कुत्र ? | प्रकाश: कुत्र ? | यानं तत्र नास्ति । |
| कन्दुक: अत्र । | नदी तत्र । | प्रकाश: सर्वत्र । | यानम् अन्यत्र । |

बालिका, कन्दुक: शुनक: च एकत्र । गृहं वृक्ष: च एकत्र ।

वदत- **अत्र, तत्र, कुत्र, अन्यत्र, सर्वत्र, एकत्र ।**

# ३. के कुर्वन्ति ?

## ३.१ एते/ते



एते छात्राः ।
एते पठन्ति ।
के पठन्ति ?
एते छात्राः पठन्ति ।



ते अश्वाः ।
ते धावन्ति ।
के धावन्ति ?
ते अश्वाः धावन्ति ।



छात्राः लिखन्ति ।



पुरुषाः उपविशन्ति ।



शकटाः गच्छन्ति ।



बालकाः पश्यन्ति ।

• **कृतिः –**

| | |
|---|---|
| शिक्षक, वैद्य, चित्रकार, गायक, सैनिक, याचक, वृद्ध, पुरुष, बालक, सिंह, रक्षक | एतैः शब्दैः सह छात्राः परिचितक्रियापदानि योजयित्वा बहुवचनवाक्यानि वदन्ति । |

## ३.२ एताः/ताः



एताः बालिकाः।
एताः वदन्ति ।
काः वदन्ति ?
एताः बालिकाः वदन्ति ।




ताः विद्यार्थिन्यः ।
ताः नृत्यन्ति ।
काः नृत्यन्ति ?
ताः विद्यार्थिन्यः नृत्यन्ति ।



चटकाः कूजन्ति ।



महिलाः नमन्ति ।



पिपीलिकाः गच्छन्ति ।



ताः खेलन्ति ।

• **कृतिः–** शिक्षकः शब्दं वदति । छात्राः बहुवचनं वदन्ति । यथा–मापिका–मापिकाः । पेटिका, छात्रा, वैद्या, निवेदिका, पुस्तिका, अङ्गुली, लेखनी, कूपी, द्रोणी।

## ३.३ एतानि/तानि





एतानि कमलानि ।
एतानि विकसन्ति ।
कानि विकसन्ति ?
एतानि कमलानि विकसन्ति ।

तानि पत्राणि ।
तानि पतन्ति ।
कानि पतन्ति ?
तानि पत्राणि पतन्ति ।



विमानानि गच्छन्ति ।




यानानि तिष्ठन्ति ।




वाहनानि धावन्ति।

● **कृतिः– चित्रं दृष्ट्वा वाक्यं लिखत ।**









________________ ________________ ________________ ________________

## भाषाभ्यासः

### १. वाक्यानि पूरयत ।

१. एते ________ (सिंह) गर्जन्ति ।
२. ________(के/काः/कानि) यानानि धावन्ति ?
३. महिलाः ________ । (वदति/वदन्ति)
४.______ बालिकाः नृत्यन्ति।(ते/ताः/तानि)
५.________(नदी) वहन्ति ।
६. वैद्याः ________ । (पश्यति/पश्यन्ति)

### २) परिच्छेदं पूरयत।

(पिबन्ति, भवन्ति, ते, मिलन्ति, पश्यन्ति)



ग्रीष्मावकाशे सर्वेशस्य गृहे कोऽपि नास्ति । अतः सर्वेशः उपेन्द्रः अभिषेकः च सर्वे एकत्र ______ । ______ सङ्गणके चित्रपटं पश्यन्ति। किञ्चित् समयानन्तरं ते पिपासिताः______। अतः शीतकपाटिकायां किम् अस्ति इति ते______ । तत्र 'पानकनिर्माणाय' सर्वं साहित्यम् अस्ति । अतः ते पानकं कुर्वन्ति आनन्देन च ______।

# ४. द्वौ, द्वे, द्वे ।

## ४.१ एतौ/तौ



एतौ शुनकौ ।
एतौ खादतः ।
कौ खादतः ?
एतौ शुनकौ खादतः ।



तौ बालौ ।
तौ खेलतः ।
कौ खेलतः ?
तौ बालौ खेलतः ।

## ४.२ एते/ते




एते गायिके ।
एते गायतः ।
के गायतः ?
एते गायिके गायतः ।



ते विद्यार्थिन्यौ ।
ते पठतः ।
के पठतः ?
ते विद्यार्थिन्यौ पठतः ।

## ४.३ एते/ते



एते वाहने ।
एते गच्छतः ।
के गच्छतः ?
एते वाहने गच्छतः ।



ते पुष्पे।
ते विकसतः ।
के विकसतः ?
ते पुष्पे विकसतः ।

**१. तालिकां पूरयत ।**

| | |
|---|---|
| छात्रः पठति । | छात्रौ पठतः । |
| व्याघ्रः गर्जति । | ____________ |
| ____________ | मार्जारौ पिबतः । |
| गजः गच्छति । | ____________ |
| ____________ | पुरुषौ पश्यतः । |

**२. मेलनं कुरुत ।**

| | |
|---|---|
| गृहम् | ते |
| तत् | पत्रे |
| पत्रम् | पुस्तके |
| पुस्तकम् | गृहे |

**३. चित्राणि आलिखत ।**

१. कमले विकसतः । ४. मयूरौ नृत्यतः ।
२. नौके तरतः । ५. मेघौ वर्षतः ।
३. सिंहौ गर्जतः । ६. फले पततः ।

**४. चित्रवर्णनं कुरुत ।**


____________


____________


____________


____________

**गायत! नन्दत!**

सर सर आयान्ति वर्षाधाराः
अत्र प्रसन्नाः सर्वे जीवाः ।
वृक्षैः प्राप्तं नवजीवनम्
नृत्यन्ति मोदेन बालाः सततम् ॥१॥

धप् धप् पतन्ति जलप्रपाताः
डूँव डूँव कुर्वन्ति कूपमण्डूकाः ।
टप् टप् गायन्ति पर्णेषु बिन्दवः
पक्ववटखादने मग्ना जनाः ॥२॥

कृष्णान् मेघान् पश्य आकाशे
धडाम् धुडुम् धडाम् धुडुम् गर्जन्ति ते ।
जलेन क्लिन्नं जातमङ्गं
धो धो धो वर्षन्ति मेघाः सततम् ॥३॥

नृत्यं कुर्वन्ति मयूरास्ते
सिंहा गर्जन्ति ननु मेघनादः ।
सत्वरं वहन्ति सागरं नद्यः
प्राणा हि प्राणिनां वर्षाकालः ॥४॥

– डॉ. श्रीहरिः गोकर्णकरः



# ५. अहं, त्वम् ।

## ५.१ अहम्



अहं बालकः अस्मि ।
अहं प्रभाते स्नानं करोमि ।
अहं मध्याह्ने शालां गच्छामि ।
अहं सायङ्काले खेलामि ।
अहं रात्रौ निद्रां करोमि ।



अहं बालिका अस्मि ।
अहं प्रातराशं खादामि ।
अहं प्रभाते शालां गच्छामि ।
अहं मध्याह्ने स्वाध्यायं करोमि ।
अहं सायङ्काले गीतं गायामि ।

- **कृतिः–** छात्रः स्वदिनचर्यां पञ्चषड्वाक्येषु वदति ।

## ५.२ त्वम्

शिक्षिका – त्वं कुत्र वससि ?
छात्रः – अहं नाशिकनगरे वसामि ।
शिक्षिका – त्वं कदा खेलसि ?
छात्रः – अहं सायङ्काले सपादसप्तवादने खेलामि ।
शिक्षिका – तर्हि कदा अध्ययनं करोषि ?
छात्रः – रात्रौ दशवादनपर्यन्तम् अध्ययनं करोमि ।
शिक्षिका – त्वं सम्यक् गायसि । चित्रमपि सुन्दरम् आलिखसि । अध्ययनम् अपि करोषि । सत्यमेव त्वम् आदर्शः बालकः ।


- **कृतिः–** एकः छात्रः अन्यं छात्रं प्रश्नं पृच्छति । अन्यः छात्रः उत्तरं वदति । 'त्वं कुत्र वससि ? त्वं किं करोषि ?' एवं छात्राः परस्परं प्रश्नं कुर्वन्ति । उत्तरं वदन्ति च ।

### भाषाभ्यासः

**अहम्/त्वम् इति शब्दं योजयत ।**

१. ______ खेलामि । २. ______ धावसि । ३. ______ पठसि ।
४. ______ पश्यामि । ५. ______ कूर्दसि । ६. ______ हसामि ।

## ५.३ आवाम्, वयम्



आवां लिखावः ।



वयं लिखामः ।




आवां लिखावः ।



वयं धावामः ।

- **कृतिः–** एकः छात्रः वाक्यं वदति (अहं गच्छामि ।), अनन्तरं बालकद्वयम् 'आवां' शब्देन (आवां गच्छावः ।), अन्ये बालकाः 'वयं' शब्देन (वयं गच्छामः ।) इति बहुवचनं वदन्ति । तथैव अन्ये छात्राः ।

## ५.४ युवां, यूयम्



त्वं पश्यसि ।



युवां पश्यथः ।



यूयं पश्यथ ।

## भाषाभ्यासः

### १. योग्यं पर्यायं चिनुत लिखत च ।

१. अहम् ________ । (उपविशामि/उपविशामः)
२. ________ क्रीडामः । (अहं/वयं)
३. वयं ________ । (भ्रमामि/भ्रमामः)
४. वयं ________ । (नमामि/नमामः)
५. ________ हसामि । (अहं/वयं)
६. ________ वदसि । (त्वं/यूयं)
७. ________ क्षिपथ । (त्वं/यूयं)
८. ________ नृत्यसि । (त्वं/यूयं)
९. ________ लिखथः । (त्वं/युवां)
१०. यूयं ________ । (पठसि/पठथ)

### क्रियापदरूपाणि लिखत ।

१. सः ________। (गद्)
२. तौ ________। (गर्ज्)
३. ते ________ । (वद्)
४. सा ________ । (जल्प्)
५. ते ________ । (जप्)
६. ताः ________। (जय्)
७. त्वं ________। (कूज्)
८. युवां ________ । (नम्)
९. यूयं ________। (खाद्)
१०. अहं ________। (क्रीड्)
११. आवां________ । (हस्)
१२. वयं ________ । (वस्)
१३. युवकौ________ । (तप्)
१४. पुरुषाः ________ । (धाव्)
१५. बालिकाः ________ । (भ्रम्)
१६. महिले ________ । (यज्)
१७. सैनिकाः ________ । (रक्ष्)
१८. कृषकः ________ । (वप्)

### गायत ! नन्दत !



**चटक! चटक!**

चटक, चटक, रे चटक
चिवँ चिवँ, कूजसि त्वं विहग !
नीडे निवससि सुखेन डयसे
खादसि फलानि मधुराणि ।
विहरसि विमले विपुले गगने
नास्ति जनः खलु वारयिता ।।
मातापितराविह मम न स्तः
एकाकी खलु खिन्नोऽहम् ।
एहि समीपं चिवँ चिवँ मित्र
ददामि तुभ्यं बहुधान्यम् ।।
चणकं स्वीकुरु पिब रे नीरं
त्वं पुनरपि रट चिवँ चिवँ चिवँ ।
तोषय मां कुरु मधुरालापं
पाठय मामपि तव भाषाम् ।।

–डॉ. विश्वासः, बेंगलुरु ।

# ६. सङ्ख्याः ।

| | | | | |
|---|---|---|---|---|
| १. एकम् | ११. एकादश | २१. एकविंशतिः | ३१. एकत्रिंशत् | ४१. एकचत्वारिंशत् |
| २. द्वे | १२. द्वादश | २२. द्वाविंशतिः | ३२. द्वात्रिंशत् | ४२. द्विचत्वारिंशत् |
| ३. त्रीणि | १३. त्रयोदश | २३. त्रयोविंशतिः | ३३. त्रयस्त्रिंशत् | ४३. त्रिचत्वारिंशत् |
| ४. चत्वारि | १४. चतुर्दश | २४. चतुर्विंशतिः | ३४. चतुस्त्रिंशत् | ४४. चतुश्चत्वारिंशत् |
| ५. पञ्च | १५. पञ्चदश | २५. पञ्चविंशतिः | ३५. पञ्चत्रिंशत् | ४५. पञ्चचत्वारिंशत् |
| ६. षट् | १६. षोडश | २६. षड्विंशतिः | ३६. षट्त्रिंशत् | ४६. षट्चत्वारिंशत् |
| ७. सप्त | १७. सप्तदश | २७. सप्तविंशतिः | ३७. सप्तत्रिंशत् | ४७. सप्तचत्वारिंशत् |
| ८. अष्ट | १८. अष्टादश | २८. अष्टाविंशतिः | ३८. अष्टात्रिंशत् | ४८. अष्टचत्वारिंशत् |
| ९. नव | १९. नवदश | २९. नवविंशतिः | ३९. नवत्रिंशत् | ४९. नवचत्वारिंशत् |
| १०. दश | २०. विंशतिः | ३०. त्रिंशत् | ४०. चत्वारिंशत् | ५०. पञ्चाशत् |

## भाषाभ्यासः

- रटनाभ्यासः १-५० सरलक्रमेण ।

क्रीडा- १) ५० तः १ विपरीतक्रमेण सङ्ख्यारटनम् । २) एकश्वासेन यावदधिकं सङ्ख्यारटनम् ।

३) ॐ क्रीडा- छात्राः १-५० सङ्ख्याः एकैकशः वदन्ति । तन्मध्ये ५ सङ्ख्यायाः गुणकस्थाने ॐ इति वदन्ति । (यथा - १, २, ३, ४, ॐ, ६, ७, ८, ९, ॐ, ११, १२....)

### १. अक्षरैः अङ्कैः वा सङ्ख्याः लिखत ।

५ ________ ।    २३ ________ ।    ________ सप्तत्रिंशत् ।

२ ________ ।    ४५ ________ ।    ________ षोडश ।

I6BIAY

### २. योग्यम् उत्तरम् अक्षरैः लिखत ।

१) संवत्सरस्य कति मासाः ?

२) गीतायाः कति अध्यायाः ?

३) कति पाण्डवाः ?

४) भोजने कति रसाः ?

५) इन्द्रचापस्य कति वर्णाः ?

**गायत! नन्दत!**



एकं द्वे त्रीणि इह पुष्पाणि ।
चत्वारि पञ्च भयं विमुञ्च ।
षड् सप्त अष्ट अपसर दुष्ट ।
नव दश, उपविश । वद, लिख, पठ, हस ॥
- ओरोबिन्दो-आश्रम-सान्द्रमुद्रिकातः

**अध्ययनाय उपयुक्ताः आन्तरजालसङ्केताः ।**

The Practical Sanskrit – English Dictionary by V. S. Apte

http://dsal.uchicago.edu/dictionaries/apte


## श्रवणाभ्यासः

वाचनम् ⟶ श्रवणम् ⟶ अनुवाचनम् ⟶ अवबोधनम्

• **कृतिः –** शिक्षकः कथां पठति । छात्राः अनुपठन्ति । शिक्षकः अपरिचितशब्दानाम् अर्थं वदति ।

### शठं प्रति शाठ्यम् ।

बकस्य शृगालस्य च मित्रता अस्ति । एकदा शृगालः बकं भोजनार्थं स्वगृहम् आह्वयति । शृगालः स्थालिकायां पायसं परिवेषयति । बकस्य चञ्चुः दीर्घा अस्ति । स्थालिकायां परिवेषितं पायसं बकः खादितुं न शक्नोति । शृगालः तस्य उपहासं करोति । पुनः कदाचित् बकः शृगालं भोजनार्थं स्वगृहम् आह्वयति । तदा सः गलन्तिकायां पायसं परिवेषयति । गलन्तिकायां परिवेषितं पायसं शृगालः खादितुं न शक्नोति । बकः तस्य उपहासं करोति । शृगालः अवगच्छति– ''मम पूर्वकृतस्य एतत् फलम्'' इति । सः मित्रस्य क्षमां प्रार्थयते । तयोः मैत्री दृढा भवति ।



• **कृतिः–** शिक्षकः कथां कथयति । छात्राः शृण्वन्ति, अवगच्छन्ति, माध्यमभाषया पुनः वदन्ति ।

### सत्यप्रियः काष्ठिकः ।



एकः काष्ठिकः काष्ठच्छेदनार्थं वनं गच्छति । अनवधानात् तस्य हस्तात् कुठारः जले पतति । सः चिन्ताकुलः भवति । तदा तत्र देवः आगच्छति । देवः जले मज्जति । सुवर्णकुठारं गृहीत्वा बहिः आगच्छति । सः वदति, ''अपि एषः तव कुठारः ?'' काष्ठिकः वदति– ''न एषः मम कुठारः ।'' तदनन्तरं देवः रौप्यकुठारं दर्शयति । काष्ठिकः तदपि न स्वीकरोति । अन्ते देवः लोहकुठारम् आनयति । काष्ठिकः वदति, ''आम्, एषः एव मम कुठारः ।'' प्रसन्नः देवः तस्मै सर्वान् कुठारान् यच्छति । अहो काष्ठिकस्य निःस्पृहता सत्यप्रियता च !


## भाषासूत्रम् – १


### क्रियापदानि–१

### लट्‌लकार: (वर्तमानकाल:) परस्मैपदम्

एकवचनम् | द्विवचनम् | बहुवचनम्

**प्रथमपुरुष:**


१

स:

२

तौ

३

ते

**मध्यमपुरुष:**

४

त्वम्

५

युवाम्

६

यूयम्

**उत्तमपुरुष:**

७

अहम्

८

आवाम्

९

वयम्

| | | | |
|---|---|---|---|
| प्रथमपुरुष: | खादति १ | खादत: २ | खादन्ति ३ |
| मध्यमपुरुष: | खादसि ४ | खादथ: ५ | खादथ ६ |
| उत्तमपुरुष: | खादामि ७ | खादाव: ८ | खादाम: ९ |

**पञ्चदश वाक्यानि । (परस्मैपदम्) कण्ठस्थीकरणार्थम् ।**

| | | |
|---|---|---|
| १ स: बालक: खादति । | २ तौ बालकौ खादत: । | ३ ते बालका: खादन्ति । |
| १ सा कन्या खादति । | २ ते कन्ये खादत: । | ३ ता: कन्या: खादन्ति । |
| १ तद् अपत्यं खादति । | २ ते अपत्ये खादत: । | ३ तानि अपत्यानि खादन्ति । |
| ४. त्वं खादसि । | ५. युवां खादथ: । | ६. यूयं खादथ । |
| ७. अहं खादामि । | ८. आवां खादाव: । | ९. वयं खादाम: । |

एतेषु वाक्येषु 'खादति' इति स्थाने पठति, धावति, हसति, खेलति, गच्छति, आगच्छति, उपविशति, उत्तिष्ठति एतेषाम् उपयोगं कृत्वा पुन: वदत स्मरत च ।

क्रियापदस्य मूलं = धातुः ।
धातूनां दश विभागाः = गणाः ।
गणसूचकम् चिह्नम् = गणविकरणम् ।

**धातूनां प्रकारद्वयम्**

परस्मैपदिनः । आत्मनेपदिनः ।

कालानुसारं पदानुसारं च प्रत्ययाः भवन्ति ।

**लट्लकारः (वर्तमानकालः)**

**परस्मैपदप्रत्ययाः**

| | ए.व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | ति[१] | तः[२] | अन्ति[३] |
| म.पु. | सि[४] | थः[५] | थ[६] |
| उ.पु. | मि[७] | वः[८] | मः[९] |

**क्रियापदसूत्रम् –** **(मूलधातुः + गणविकरणम्) = धात्वङ्गम् + प्रत्ययः = क्रियापदम्**
**(आदेशः) (चिह्नम्)**

| गणः | विकरणम् | उदाहरणम् |
|---|---|---|
| प्रथमः | अ | पठति |
| चतुर्थः | य | नृत्यति |
| षष्ठः | अ | लिखति |
| दशमः | अय | पूजयति |

**पठति = पठ् + अ + ति**

पठ् → मूलधातुः, अ → गणविकरणम्, ति → प्रत्ययः

**पठ् (१ प. प.) = पठ् + अ = पठ + ति = पठति**

**नृत् (४ प. प.) = नृत् + य = नृत्य + ति = नृत्यति**

**लिख् (६ प. प) = लिख् + अ = लिख + ति = लिखति**

**पूज् (१० प. प) = पूज् + अय = पूजय + ति = पूजयति**

**आदेशः** (एकस्य स्थाने अपरस्य आगमनं नाम आदेशः ।)

**आदेशरहितः धातुसमूहः –** नम्–नमति, क्रुध्–क्रुध्यति, लिख्–लिखति, पूज्–पूजयति

**आदेशसहितः धातुसमूहः – गम्–गच्छ् (१ प. प.) = गच्छ् + अ = गच्छ + ति = गच्छति**

स्था [तिष्ठ्] – (**१ प. प.**) = तिष्ठति, पा [पिब्] –(**१ प.प.**) = पिबति

प्रच्छ् [पृच्छ्] – (**६ प. प.**) = पृच्छति, दा [यच्छ्] – (**१ प. प.**) = यच्छति

### पठ् १ प. प.

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | पठति | पठत: | पठन्ति |
| म. पु. | पठसि | पठथ: | पठथ |
| उ.पु. | पठामि | पठाव: | पठाम: |

### नृत् ४ प. प.

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | नृत्यति | नृत्यत: | नृत्यन्ति |
| म. पु. | नृत्यसि | नृत्यथ: | नृत्यथ |
| उ. पु. | नृत्यामि | नृत्याव: | नृत्याम: |

### लिख् ६ प. प.

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | लिखति | लिखत: | लिखन्ति |
| म. पु. | लिखसि | लिखथ: | लिखथ |
| उ.पु. | लिखामि | लिखाव: | लिखाम: |

### पूज् १० प. प.

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | पूजयति | पूजयत: | पूजयन्ति |
| म. पु. | पूजयसि | पूजयथ: | पूजयथ |
| उ. पु. | पूजयामि | पूजयाव: | पूजयाम: |

**क्रीडा –**

१. **क्रियापदसङ्ग्रह:**– प्रत्येकं छात्र: एकैकं क्रियापदं वदति । एकेन उक्तं क्रियापदम् अन्येन न वक्तव्यम् ।

२. **आशु–अभिनय:**– एक: छात्र: अभिनयेन क्रियां दर्शयति। अन्ये छात्रा: क्रियापदम् अभिजानन्ति वदन्ति च।

३. **क्रियापदशृङ्खला** – एक: छात्र: एकं क्रियापदं वदति । द्वितीय: छात्र: पूर्वोक्तक्रियापदेन सह नूतनं क्रियापदं वदति । तृतीय: छात्र: अनुक्रमेण पूर्वोक्त–क्रियापद–द्वयेन सह नूतनं क्रियापदं वदति । एवं प्रत्येकं छात्र: पूर्वोक्त–क्रियापदै: सह नूतनं क्रियापदं वदति । एवं क्रियापदानां शृङ्खला भवेत् ।

४. **अविलम्बं दशक्रियापदानि वदत ।**

५. **निरन्तरं पञ्चदशवाक्यानि वदत ।**


**वर्गपरीक्षाप्रारूपम् । गुणा: – २०**

**अभ्यासक्रम:**– स्वपरिचय:, लिङ्गज्ञानम्, पुरुषज्ञानम्, वचनज्ञानम्, लट्रूपाणि ।


| | | |
|---|---|---|
| **प्रारूपम्** – | १) चित्राणां नामानि लिखत । (चित्रपदकोषत:) | ४ |
| | २) वचनम् अनुसृत्य चित्रनामानि लिखत । | ४ |
| | ३) स्तम्भमेलनं कुरुत । (कर्तृपदं–क्रियापदम्) | ४ |
| | ४) सङ्ख्या: लिखत । (अक्षरै:/अङ्कै:) | १ |
| | ५) शब्दान् पृथक् कुरुत । (लिङ्गानुसारम्) (केवलं षट्) | ३ |
| | ६) मञ्जूषात: योग्यं पर्यायं चित्वा वाक्यानि पूरयत । (किमपि एकम्) | २ |
| | ७) क्रियापदकोष्टकं पूरयत । (लट्रूपाणि) | २ |

## वर्गपरीक्षा

**१. चित्राणां नामानि लिखत ।** ४

१  २  ३  ४ 

**२. वचनम् अनुसृत्य चित्रनामानि लिखत ।** ४

१  २  ३  ४ 

**३. स्तम्भमेलनं कुरुत ।** ४

| अ | ब | उत्तराणि |
|---|---|---|
| १) महिला: | गायति | ----- |
| २) पुरुष: | पश्यसि | ----- |
| ३) एतौ | नृत्यन्ति | ----- |
| ४) त्वम् | वदत: | ----- |

**४. सङ्ख्या: अक्षरै: लिखत ।** १

१) २७ ________ । २) ४३ ________ ।

**५. शब्दान् पृथक् कुरुत । (केवलं षट्)** ३

| शब्दा: | स: | सा | तद् |
|---|---|---|---|
| चन्द्र:, माला, गज:, गृहम्, पत्रम्, मापिका, पादरक्षा, विमानम् | | | |

**६. मञ्जूषात: योग्यं पर्यायं चित्वा वाक्यानि पूरयत । (किमपि एकम्)** २

१) ________नाम सत्यप्रिय: । अहं ________ । अहं वर्धानगरे ________ । मम माता ________ ।

मञ्जूषा– नीरजा, मम, वसामि, छात्र:

२) वर्षाधारा: पतन्ति । बाला: मोदेन ________ । जलप्रपाता: ________ । ________ आकाशे गर्जन्ति । ________ सागरं प्रति वहन्ति । मञ्जूषा– कृष्णमेघा:, पतन्ति, नृत्यन्ति, नद्य:

**७. क्रियापदकोष्टकं पूरयत ।** २

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | ________ | धावत: | धावन्ति |
| म. पु. | धावसि | धावथ: | ________ |
| उ. पु. | ________ | ________ | धावाम: |

# ७. वर्णानां संवादः ।

(द्वितीयः घटकः)

अ–आ–इ–ई–उ–ऊ– ऋ–ॠ–ऌ –ए–ऐ–ओ–औ

वयं सर्वे स्वराः। ऋ, ॠ, ऌ एते अपि स्वराः एव। ऋग्वेदः, ऋषिः आदीनां शब्दानाम् अग्रस्थाने ऋ इति स्वरः ।

ं

अहम् अनुस्वारः । अहं तु स्वराणाम् आश्रयेण एव तिष्ठामि। किं मम उच्चारणं कर्तुम् इच्छसि? तर्हि वद 'अम्' 'आम्' 'इम्' इति ।

ः

अहं विसर्गः । मम अपि उच्चारणं स्वरैः सह भवति । यदि माम् वक्तुम् इच्छसि तर्हि वद, 'अः' 'इः' 'उः' इति ।

क् ख् ग् घ् ङ्

वयं व्यञ्जनानि । वयं सर्वे सहोदराः। 'क' वर्गीयाः। अस्माकम् उच्चारणं कण्ठे भवति। अतः वयं कण्ठ्याः।

च् छ् ज् झ् ञ्

वयम् अपि सहोदराः। 'च' वर्गीयाः। अस्माकम् उच्चारणस्थानम् अस्ति तालुः। अतः वयं तालव्याः।

ट् ठ् ड् ढ् ण्

वयं खलु 'ट' वर्गीयाः । अस्माकम् उच्चारणस्थानं वर्तते मूर्धा । अतः वयं मूर्धन्याः ।

त् थ् द् ध् न्

वयं 'त' वर्गीयाः । वयं दन्त्याः। अस्माकम् उच्चारणे जिह्वा दन्तान् स्पृशति ।

प् फ् ब् भ् म्

वयं 'प' वर्गीयाः । अस्माकम् उच्चारणे ओष्ठौ सम्मिलतः । वयं खलु ओष्ठ्याः ।

य् — अहं तालव्यः।

र् — अहं मूर्धन्यः।

ल् — अहं दन्त्यः।

व् — अहं दन्तोष्ठ्यः।

श् — यदा मम उच्चारणं भवति तदा जिह्वायाः मध्यः तालुं किञ्चित् स्पृशति।यथा शशकः इति शब्दे। अतः अहं तालव्यः।

ष् — यदा मम उच्चारणं भवति तदा जिह्वायाः पृष्ठभागः मूर्धानं किञ्चित् स्पृशति। यथा षट्कोणः इति शब्दे । अतः अहं मूर्धन्यः।

स् — यदा मम उच्चारणं भवति तदा जिह्वायाः अग्रं दन्तान् किञ्चित् स्पृशति। यथा समीरः इति शब्दे। अतः अहं दन्त्यः।

ह् — अहं कण्ठ्यः।

क्ष् — (क् + ष्) एतयोः संयोगेन अहं भवामि। अतः अहं संयुक्ताक्षरम्।

ज्ञ् — (ज् + ञ्) एतयोः संयोगेन अहं भवामि। अतः अहमपि संयुक्ताक्षरम् ।

१. **तालिकां पूरयत ।**

| **ह्रस्वस्वरः** | **दीर्घस्वरः** |
|---|---|
| अ | ---- |
| --- | ई |
| ---- | ऊ |
| ऋ | ---- |

२. **अधोदत्तेषु वर्गेषु योग्यं वर्णं लिखत ।**

ञ्, म्, ङ्, ण्, न्

क् ख् ग् घ् .... ।

च् छ् ज् झ् .... ।

ट् ठ् ड् ढ् .... ।

त् थ् द् ध् .... ।

प् फ् ब् भ् .... ।

३. **अधोदत्तान् शब्दान् पश्यत, पठत, उच्चारणभेदम् अवगच्छत ।**

आशयः, विषयः, मशकः, मूषकः, सकलः, शकलः ।

४. **समूहेतरं वर्णं चिनुत ।**

१) क् ख् ग् ङ् ठ्  ३) ई ए उ क्ष् ओ

२) प् छ् फ् म् भ्  ४) न् ध् थ् च् द्

५. **शुद्धं शब्दं चिनुत ।**

१) रूचा - ऋचा २) पृथ्वी - पृथ्वी ३) ऋणम् - रुणम्

४) रूषिः- ऋषिः ५) विष्वासः- विश्वासः

६. **शब्दकोषे 'ज्ञानम्' तथा 'क्षमा' इति शब्दद्वयम् अन्विष्यत ।**


७. **अनुपठत-देवः, मालाः, कविः, नदीः, मतिः, भानुः, धेनूः, देवैः, नद्योः, मतेः, गौः ।**

## पठत-बोधत



- पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता ।
  पवर्गरचितामूर्तिरपवर्गप्रदायिनी ।।

**मञ्जूषायां लिखितानां शब्दानाम् ऋ अक्षरेण प्रारम्भः भवति । अन्विष्यत । लिखत ।**




I6KECL

१ भल्लूकः
२ ग्रीष्मः वसन्तः वा
३ वेदेषु एकः
४ बलीवर्दः
५ सत्यम्
६ अन्यस्मात् स्वीकृतं धनम्
७ समृद्धिः, वैभवम्

# ८.१ सम्बन्धवाचकाः ।

८.१.१

| | | |
|---|---|---|
| दशरथः | | रामः |
| रावणः | पिता ← | मेघनादः |
| धृतराष्ट्रः | पुत्रः → | दुर्योधनः |
| रामः | | लवः |
| भीमः | | घटोत्कचः |

कस्य पुत्रः रामः ?  दशरथस्य पुत्रः रामः ।
कस्य पिता दशरथः ? रामस्य पिता दशरथः ।

१. रावणस्य पुत्रः मेघनादः ।
२. ____ पुत्रः दुर्योधनः ।
३. ____ ____ लवः ।
४. भीमस्य ____ ____।
५. मेघनादस्य पिता रावणः ।
६. दुर्योधनस्य ____ ____।
७. ____ पिता रामः ।
८. ____ पिता ____।

८.१.२

| | | |
|---|---|---|
| रामायणम् | | वाल्मीकिः |
| महाभारतम् | कविः | व्यासः |
| रघुवंशम् | → | कालिदासः |
| गीतगोविन्दम् | | जयदेवः |

१. रामायणस्य कविः वाल्मीकिः ।
२. महाभारतस्य कविः व्यासः ।
३. ________ कविः कालिदासः ।
४. ________ कविः जयदेवः ।

८.१.३

| | | |
|---|---|---|
| सीता | | रामः |
| ऊर्मिला | | लक्ष्मणः |
| रमा | पतिः → | माधवः |
| पार्वती | पत्नी ← | शिवः |
| रुक्मिणी | | विठ्ठलः |

कस्य पत्नी सीता ?  रामस्य पत्नी सीता ।
कस्याः पतिः रामः ? सीतायाः पतिः रामः ।

१. ______ पतिः लक्ष्मणः ।
२. ______ पतिः माधवः ।
३. पार्वत्याः पतिः शिवः ।
४. ______ पतिः विठ्ठलः ।
५. ______ पत्नी ऊर्मिला ।
६. ____ पत्नी ______ ।
७. ______ पत्नी पार्वती ।
८. ____ ____ ____।

८.१.४ तव-मम







एषा मम पाठशाला ।
एषा तव पाठशाला।
एषः मम स्यूतः ।
एतस्य वर्णः नीलः ।
एषा तव कूपी ।
एतस्याः वर्णः रक्तः ।



८.१.५ तस्य-तस्याः

स: बालकः । तत् तस्य पुस्तकम् ।
पुस्तकस्य नाम 'आमोदः' ।
सा तस्य लेखनी ।
तस्याः वर्णः कृष्णः ।





सा महिला ।
तस्याः शाटिका पीता ।
तस्याः स्यूतः कृष्णः ।

• **कृतिः–** छात्रः स्वसमीपे तथा च दूरे उपविष्टस्य छात्रस्य नाम कथयति ।
यथा– एतस्य नाम हरीशः । एतस्याः नाम रमा ।
तस्य नाम मकरन्दः । तस्याः नाम उमा ।

I6UAE9

## भाषाभ्यासः

### १. योग्येन रूपेण गीतं पूरयत ।

(काक) ________ वर्णः कृष्णः कृष्णः ।    (आम्र) ________ वर्णः पीतः पीतः ।
(पर्ण) ________ वर्णः हरितः हरितः ।    (गगन) ________ वर्णः नीलः नीलः ।

### २. वाक्यानि लिखत।

शर्करा → स्वादः → मधुरः ________________
यानम् → वेगः → अधिकः ________________
बालकः → युतकम् → मलिनम् ________________
नदी → जलम् → शीतम् ________________


### ३. मेलनं कुरुत ।

| | |
|---|---|
| एषः | मम |
| तद् | एतस्य |
| अहम् | तस्य |
| त्वम् | एतस्याः |
| एषा | तव |

### ४. शब्दरूपाणि लिखत । यथा देवः–देवस्य

१) सूर्यः २) स्यूतः ३) गणेशः ४) पादपः
५) माला ६) बालिका ७) मापिका ८) शाटिका
९) नदी १०) द्रोणी २) वेल्लनी १२) कर्तरी
१३) जलम् १४) गृहम् १५) वनम् १६) शरीरम्
१७) अहम् १८) एषा १९) त्वम् २०) तत्

### ५. चित्रस्थ–शब्दानाम् आधारेण वाक्यानि रचयत ।



# ८.२ कुत्र अस्ति ?

८.२.१




फलं कुत्र अस्ति ?
फलं वृक्षे अस्ति ।



कूपी कुत्र अस्ति ?
कूपी स्यूते अस्ति ।



चन्द्रः कुत्र ?
चन्द्रः गगने ।




मीनाः कुत्र तरन्ति ?
मीनाः जले तरन्ति ।

- **कृतिः–**शिक्षकः शब्दं वदति । छात्राः शब्दरूपं वदन्ति । यथा वर्गः–वर्गे
  (अ) (शब्दाः– हस्तः, फलकः, मार्गः, पर्वतः, आसन्दः, घटः, कर्णः, विद्यालयः)
- **कृतिः–** शिक्षकः शब्दं वदति । छात्राः शब्दरूपं वदन्ति । यथा गृहम्–गृहे ।
  (आ) (शब्दाः– पात्रम्, द्वारम्, मुखम्, पुष्पम्, फलम्, शाकम्, पुस्तकम्, पानकम्, दुग्धम्, उद्यानम्)

८.२.२



मौक्तिकानि कुत्र ?
मौक्तिकानि मालायाम् ।



लेखनी कुत्र ?
लेखनी पेटिकायाम् ।



नौका कुत्र वहति ?
नौका नद्यां वहति ।



जलं कुत्र अस्ति ?
जलं द्रोण्याम् अस्ति ।

- **कृतिः–** शिक्षकः शब्दं वदति । छात्राः शब्दरूपं वदन्ति । यथा–शाटिका–शाटिकायाम् ।
  (इ) (शब्दाः– मापिका, नासिका, नलिका, पाठशाला, मार्गिका, मञ्जूषा, शर्करा, वाटिका, दोला)
- **कृतिः–** शिक्षकः शब्दं वदति । छात्राः शब्दरूपं वदन्ति । यथा, नदी–नद्याम् ।
  (ई) (शब्दाः– कर्तरी, मार्जनी, लेखनी, पुनःपूरणी, घटी, कूपी)

## भाषाभ्यासः

### १. अर्थपूर्णानि वाक्यानि रचयत ।

| | | |
|---|---|---|
| (पर्वत) | मन्दिरम् | |
| (दुग्ध) | शर्करा | अस्ति |
| (लेखनी) | मसी | नास्ति |
| (वाटिका) | दोला | |
| (पुस्तक) | गीतम् | |

### २. जलं कुत्र अस्ति ? इति लिखत ।



# ८.३ सहायका: ।

८.३.१




स: सुधाखण्डेन लिखति ।



अहं चरणेन ताडयामि ।



अहं चमसेन खादामि ।



सा हस्तेन वादयति ।

• **कृति:–** शिक्षक: एकैकं शब्दं वदति । दन्तकूर्च:, चरण:, मार्जक:, दन्त:, कर्ण:, स्यूत:, दीप:, सङ्गणक:, कलश:, ताल:, खड्ग:, बाण: इति शब्दानां योग्यरूपाणि छात्रा: वदन्ति । यथा हस्त:–हस्तेन

८.३.२



स: यानेन गच्छति ।



अहं मुखेन वदामि ।



सा वस्त्रेण मार्जयति ।



मर्कट: व्यजनेन वीजयति ।

• **कृति:–** शिक्षक: शब्दं वदति । नेत्रम्, वाहनम्, जलम्, वस्त्रम्, यन्त्रम्, व्यजनम्, पुस्तकम्, भाण्डम्, शस्त्रम् इति शब्दानां योग्यरूपाणि छात्रा: वदन्ति । यथा नेत्रम्–नेत्रेण ।

८.३.३



सा मापिकया आलिखति ।



बालिका छुरिकया कर्तयति ।



माता वेल्लन्या रोटिका: करोति ।



बालक: कूप्या दुग्धं पिबति ।

• **कृति:–** शिक्षक: शब्दं वदति । रोटिका, पुस्तिका, कपाटिका, पेटिका, नलिका, उत्पीठिका, शर्करा, गुलिका, पुत्तलिका, कुञ्चिका, मार्जनी, अङ्गुली, पुन:पूरणी, अङ्कनी, कर्तरी, घटी इति शब्दानां योग्यरूपाणि छात्रा: वदन्ति । यथा शाटिका–शाटिकया, नदी–नद्या ।

## भाषाभ्यास:

### १. वाक्यानि पूरयत ।

१) महिला (द्रोणी) जलम् आनयति ।

२) बालक: (चमस) खादति ।

३) सा (हस्त) रोटिकां खादति ।

४) स: (दण्ड) ताडयति ।

५) सा (जल) मुखं प्रक्षालयति ।

६) अहं (कुञ्चिका) तालम् उद्घाटयामि ।

### ८.३.४ सह





मन्दार: निनादेन सह खेलति । शिक्षिका छात्रया सह श्लोकं पठति । नीला मोहिन्या सह पुस्तकं पठति ।

### ८.३.५ विना





मत्स्या: जलेन विना न जीवन्ति । बालक: लड्डुकेन विना किमपि न खादति । वृद्ध: उपनेत्रेण विना न पठति ।

- **कृति:-** शिक्षक: छात्रान् प्रश्नं पृच्छति, 'त्वं केन सह लिखसि/क्रीडसि/खादसि?' स्वमित्रस्य नाम योजयित्वा छात्र: उत्तरं वदति ।

**गायत! नन्दत!**




राम: याति
सीतया सह ।
कुत्र स: याति?
सरयूनदीम् ।।१।।

कृष्ण: याति
राधया सह
कुत्र स: याति?
यमुनानदीम् ।।२।।

विठ्ठल: याति
रुक्मिण्या सह ।
कुत्र स: याति?
चन्द्रभागाम् ।।३।।

- शिशुगीतानि १ अॅप्-त:।

**मम अङ्गानि ।**




**क्रीडा**-विदूषक: वदति-कर्णं दर्शयत । मुखम् उद्घाटयत । केशान् स्पृशत । हस्तम् उपरि कुरुत । नेत्रे निमीलयत ।

# ८.४ किम्? किम्?

८.४.१



१. **चित्रं दृष्ट्वा प्रश्नान् पठत ।**

१) बालक: किं पठति? (पुस्तक)
२) वृद्ध: किं धरति? (छत्र)
३) शुनक: किं खादति? (रोटिका)
४) बालिका किं क्षिपति? (कन्दुक)
५) महिला किं नयति? (द्रोणी)
६) वृद्धा किं पश्यति? (बालिका)

**चित्रवर्णनं पठत ।**

१) बालक: पुस्तकं पठति ।
२) वृद्ध: छत्रं धरति ।
३) शुनक: रोटिकां खादति ।
४) बालिका कन्दुकं क्षिपति ।
५) महिला द्रोणीं नयति ।
६) वृद्धा बालिकां पश्यति ।


## भाषाभ्यास:

१. **'किम्' शब्दस्य स्थाने उत्तरं योजयत । वाक्यं पुन: वदत ।**

१) मर्कट: किं खादति? (कदलीफल)
२) गज: किं क्षिपति? (जल)
३) शुक: किं खादति? (मरीचिका)
४) बालक: किं स्वीकरोति? (लड्डुक)
५) छात्रा किं वदति? (श्लोक)
६) पुरुष: किं पश्यति? (नदी)

**क्रीडा–** अभिनयक्रीडा – शिक्षक: छात्राय वाक्यं कथयति । छात्र: वाक्यस्य अभिनयं करोति । तस्य मित्राणि वाक्यम् अभिजानन्ति ।

## ८.४.२ बालक: कुत्र गच्छति?




**वाक्यानि कुरुत ।**

| | | |
|---|---|---|
| राम: | (सरयूनदी) | गच्छति । |
| विठ्ठल: | (चन्द्रभागा) | |
| छात्र: | (विद्यालय) | |
| माता | (पाकगृह) | |
| वृद्धा | (देवालय) | |

बालक: विद्यालयं गच्छति ।
बालक: वाटिकां गच्छति ।

# ८.५ कस्मै ? कस्यै ?



कन्या आपणिकाय
धनं यच्छति ।



यूयं पठनाय
विद्यालयं गच्छथ ।



छात्राः शिक्षिकायै
पुष्पाणि यच्छन्ति ।



आचार्याय नमः ।



शिक्षिकायै नमः ।



जनन्यै नमः ।

## भाषाभ्यासः

### १. वाक्यानि पूरयत ।

१. ________ (गणेश) नमः ।
२. ________ (सरस्वती) नमः ।
३. सः ________ (बाल) लड्डुकं यच्छति ।
४. ते ________ (भोजन) उपाहारगृहं गच्छन्ति ।
५. वयं ________ (वृद्धा) पुष्पाणि यच्छामः ।
६. त्वं ________ (मित्र) लेखनीं यच्छसि ।

### २. महिला कस्मै किं यच्छति ? इति लिखत ।


| | | | |
|---|---|---|---|
| महिला | (बालक)<br>(बालिका)<br>(भिक्षुक)<br>(सेविका)<br>(मातामही)<br>(आपणिक) | मोदकं<br>कूपीं<br>वस्त्रं<br>धनं<br>प्रातराशं<br>नाणकं | यच्छति । |

### ३. किमर्थं कुत्र गच्छति ? इति लिखत ।

| | | | |
|---|---|---|---|
| बालकः | (पठन)<br>(वाचन)<br>(व्यायाम)<br>(वस्तुक्रयण)<br>(पूजन)<br>(खादन) | शालां<br>ग्रन्थालयं<br>व्यायामशालां<br>आपणं<br>मन्दिरं<br>उपाहारगृहं | गच्छति । |

# ८.६ कस्मात् स्थानात् ?

८.६.१




एषः गृहम् आगच्छति । एषः कुतः गृहम् आगच्छति ?–

एषः वित्तकोषात् गृहम् आगच्छति । एषः रेलस्थानकात् गृहम् आगच्छति ।


एषः पाठशालायाः गृहम् आगच्छति । एषः नद्याः गृहम् आगच्छति ।

मिहिरः ग्रन्थालयं गच्छति । ग्रन्थालयात् गृहम् आगच्छति ।
अवनी मन्दिरं गच्छति । मन्दिरात् गृहम् आगच्छति ।
महिला वाटिकां गच्छति । वाटिकायाः गृहम् आगच्छति ।
पितामहः नगरीं गच्छति । नगर्याः गृहम् आगच्छति ।

• **कृतिः–** शिक्षकः शब्दं वदति । छात्राः शब्दरूपं वदन्ति ।

यथा–ग्रन्थालयः–ग्रन्थालयात् (पृष्ठं २४–'अ' तः शब्दाः), उद्यानम् –उद्यानात् (पृष्ठं २४–'आ' तः शब्दाः), पाठशाला–पाठशालायाः (पृष्ठं २४–'इ' तः शब्दाः), नदी–नद्याः (पृष्ठं २४–'ई' तः शब्दाः)

८.६.२



वृक्षात् फलं पतति ।



मेघात् जलं पतति ।



आसन्दात् गिरीशः पतति ।



बालकः अश्वात् पतति ।

## भाषाभ्यासः

**१. चित्रं दृष्ट्वा वाक्यानि वदत ।**



(हस्त) करवस्त्रं पतति ।



(पेटिका) सा पुस्तकं स्वीकरोति ।





(क्षेत्र) कृषीवलः आगच्छति ।



(नदी) माता आगच्छति ।


# ८.७ सम्बोधनम् ।
















## भाषाभ्यासः

१. **वाक्यानि कुरुत ।**

१) ............ कदा आगच्छसि ? (उदय)
२) रे ............ शीघ्रं लिखसि खलु! (विनीता)
३) भोः ............ अपि वयं पठामः ? (बालक)
४) भोः ............ यूयं सम्यक् नृत्यथ । (बालिका)

**गायत! नन्दत!**



**भोः विजय,**
आम् तात ।
**गुडं खादसि ?**
न हि तात ।
**मिथ्या वदसि ?**
न हि तात ।
**मुखम् उद्घाटय,**
हा हा हा ।।

**अध्ययनाय उपयुक्ताः आन्तरजालसङ्केताः**

1) http://Sanskritdocuments.org/atul/kathaa/
2) Sanskrit Tutorial (Class 6 to 12)
Free Download – http:// Sanskrittutorial.in

# ९. विभक्तिमाला ।

धर्मो जयति नाधर्मः, सत्यं जयति नानृतम् ।
क्षमा जयति न क्रोधो, देवो जयति नासुरः ।। **प्रथमा** ।।

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ।। **द्वितीया** ।।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ।। **तृतीया** ।।

विद्या विवादाय धनं मदाय
खलस्य शक्तिः परपीडनाय ।
साधोस्तु सर्वं विपरीतमेतद्
ज्ञानाय दानाय च रक्षणाय ।। **चतुर्थी** ।।

तैलाद्रक्षेद् जलाद्रक्षेद् रक्षेत् शिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यम् एवं वदति पुस्तकम् ।। **पञ्चमी** ।।

नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ।। **षष्ठी**।।

व्यसने मित्रपरीक्षा शूरपरीक्षा रणाङ्गणे भवति ।
विनये भृत्यपरीक्षा दानपरीक्षा च दुर्भिक्षे ।। **सप्तमी** ।।


आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ।। **सम्बोधनम्**।।


**रामो** राजमणिः सदा विजयते **रामं** रमेशं भजे
**रामेणा**भिहता निशाचरचमू **रामाय** तस्मै नमः ।
**रामान्ना**स्ति परायणं परतरं **रामस्य** दासोऽस्म्यहम्
**रामे** चित्तलयः सदा भवतु मे भो **राम** मामुद्धर ।।

## श्लोकः – १

१. प्रथमान्तपदानि लिखत ।

२. जालरेखाचित्रं पूरयत ।








## श्लोकः – २

१. द्वितीयान्तपदानि लिखत ।

२. सुभाषिते क्रियापदं किम्?

३. जालरेखाचित्रं पूरयत ।




## श्लोकः – ३

१. तृतीयान्तपदानि लिखत ।

२. समानार्थकशब्दान् मेलयत ।

| | |
|---|---|
| विनोदः | दुरभ्यासः |
| मूर्खः | शयनम् |
| निद्रा | मनोरञ्जनम् |
| व्यसनम् | मूढः |

३. एकवाक्येन उत्तरं लिखत ।

१. धीमतां कालः कथं गच्छति?

२. मूर्खाणां कालः कथं गच्छति?

## श्लोकः – ४

१. चतुर्थ्यन्तपदानि लिखत ।

२. स्तम्भपूरणं कुरुत ।

| किम् | किमर्थम् | |
|---|---|---|
| | खलस्य | सज्जनस्य |
| विद्या | | |
| धनम् | | |
| शक्तिः | | |

३. एकवाक्येन उत्तरं लिखत ।

१. साधोः विद्या किमर्थं भवति ?

२. कस्य शक्तिः परपीडनाय भवति ?

## श्लोकः – ५

१. पञ्चम्यन्तपदानि लिखत ।


२. जालरेखाचित्रं पूरयत ।




## श्लोकः – ६

१. षष्ठ्यन्तपदानि लिखत ।

२. जालरेखाचित्रं पूरयत ।



**श्लोकः –७**

१. सप्तम्यन्तपदानि लिखत ।

२. स्तम्भपूरणं कुरुत ।

परीक्षा

| कस्य ? | कदा ? |
|---|---|
| मित्रस्य | |
| शूरस्य | |
| भृत्यस्य | |
| दानस्य | |

**श्लोकः –८**

१. सम्बोधनान्तपदानि लिखत ।

२. 'सूर्य' इत्यस्य शब्दस्य कृते अमरपङ्क्तिं लिखत।

**श्लोकः –९**

१. 'राम' इति शब्दस्य का विभक्तिः वाक्ये प्रयुक्ता इति लिखत ।

१. राजमणिः रामः सदा विजयते ।
२. अहं रामं भजे ।
३. रामेण निशाचरचमूः अभिहता ।
४. तस्मै रामाय नमः ।
५. रामात् परतरं परायणं न अस्ति ।
६. अहं रामस्य दासः अस्मि ।
७. मे (मम) चित्तलयः सदा रामे भवतु ।
८. भो राम, (त्वं) माम् उद्धर ।

• सर्वश्लोकानां सरलार्थं माध्यमभाषया लिखत ।

• **अधोदत्तेषु श्लोकेषु उक्तां विभक्तिम् अधोरेखितां कुरुत ।**

रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जनाः ।
एते परोपकाराय लोके देवेन निर्मिताः।। (प्रथमा)

नमामि शारदां देवीं विद्यारम्भे सुमङ्गलाम् ।
नरस्तस्याः प्रसादेन पाण्डित्यं लभते सदा ।।(द्वितीया)

दरिद्रता धीरतया विराजते
कुभोजनं चोष्णतया विराजते।
कुरूपता शीलगुणेन राजते
कुवस्त्रता शुभ्रतया विराजते।। (तृतीया)

दानाय लक्ष्मीः सुकृताय विद्या
चिन्ता परेषां सुखवर्धनाय ।
परावबोधाय वचांसि यस्य
धन्यस्त्रिलोकीतिलकः स एव ।। (चतुर्थी)

पादपानां भयं वातात् पद्मानां शिशिराद्भयम् ।
पर्वतानां भयं वज्रात् साधूनां दुर्जनात् भयम् ।।(पञ्चमी)

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ।।(षष्ठी)

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ।।(सप्तमी)

वृक्षः फलान्वितो भाति वृक्षं धूनयते कपिः ।
वृक्षेण वार्यते तापः जलं वृक्षाय दीयते ।।
वृक्षात् पतन्ति पर्णानि वृक्षस्य प्रसरो महान्
वृक्षे खगा निकूजन्ति वृक्ष धन्योऽसि भूतले ।।

I746FH

**अस्ति (✓) वा नास्ति (×) इति लिखत ।**

| मम समीपे | वर्गे | गृहे | ग्रन्थालये |
|---|---|---|---|
| लेखनी | चित्रफलकम् | दूरदर्शनम् | संस्कृतकथापुस्तकम् |
| लेखनपुस्तिका | दिनदर्शिका | सङ्गणकः | सम्भाषणसन्देशः (संस्कृतमासिकम्) |
| शब्दधातुरूपावलिः | उत्पीठिका | कपाटिका | संस्कृतशब्दकोषः |
| शब्दकोषः | आसन्दः | शीतकपाटिका | सुधर्मा (संस्कृतदैनिकम्) |
| पाठ्यपुस्तकम् | सुधाखण्डः | दर्पणः | अमरकोषः |
| द्विचक्रिका | फलकमार्जनी | दण्डदीपः | संस्कृतिकोषः |

# १०. मम शिक्षिका ।

I7D2HJ

**कृतिः-** शिक्षकः पाठं पठति । छात्राः शृण्वन्ति अवगच्छन्ति च ।




एषा मम संस्कृतशिक्षिका हर्षदा । एषा सरलं सुगमं च पाठयति । सा छात्रैः सह स्नेहेन आचरति । तस्याः उच्चारणम् अतीव स्पष्टम् । सा श्लोकान् सम्यक् गायति । सा पाठने आधुनिक-साधनानाम् उपयोगं करोति वयं संस्कृतवर्गे न केवलं पठामः अपि तु भाषाक्रीडया आनन्दम् अनुभवामः । तेन अस्माकं संस्कृतरुचिः वर्धते ।



सा छात्रान् ग्रन्थालयं नयति । विविधानि पुस्तकानि दर्शयति ।
वयं तानि पुस्तकानि आनन्देन पठामः ।
मम संस्कृतशिक्षिकायाः व्यक्तिमत्त्वं प्रसन्नम् ।
तस्याः अध्यापनेन वयं सन्तुष्टाः भवामः ।

## भाषाभ्यासः

### रिक्तस्थानानि पूरयित्वा वर्णनं कुरुत ।

#### मम कुटुम्बम् ।



एषः/एषा अहम् । अहम् अष्टमीकक्षायां (पठ्) _____ । अत्र मम कुटुम्बजनाः । (तद्) _____ मम जननी । एतस्याः नाम _____ । (तद्) _____ रुचिरं भोजनं करोति। एषः (अस्मद्) _____ जनकः । एतस्य नाम _____ । सः _____ रूपेण कार्यं करोति । विरामदिने सः (अस्मद्) _____ भ्रमणार्थं नयति । कदाचित् आवां तरणार्थं च (गम्)_____। (एतद्) _____ मम भ्राता । एतस्य नाम _____ । सः मम अनुजः/अग्रजः _____ कक्षायां पठति । एषा मम अग्रजा/अनुजा । एषः मम पितामहः । सः कथां कथयति। अहं पितामहीं चलभाषप्रयोगं पाठयामि । पितामहं च सङ्गणकं पाठयामि । मम कुटुम्बं मम प्रियम्।

#### मम गृहम् ।

मम गृहं _____ नगरे अस्ति । गृहं परितः उन्नताः वृक्षाः सन्ति । गृहे प्रकोष्ठाः सन्ति । (प्रथम) _____ प्रकोष्ठे आसन्दः, दूरदर्शनं व्यजनं च वर्तन्ते । (पाकगृह) _____ स्थालिकाः, चमसाः, विविधभाण्डानि तथैव चुल्लिः शीतपेटिका च वर्तन्ते। शयनकक्षे तल्पः, विद्युद्दीपः व्यजनानि च वर्तन्ते। भित्तौ मम कुटुम्बस्य छायाचित्रम् अस्ति । गृहे मम तथा च भगिन्याः कृते एका अभ्यासिका वर्तते । तत्र उत्पीठिका, आसन्दाः, लेखनवस्तूनि च सन्ति । तथैव तत्र अध्ययनार्थम् उपयुक्ताः विविधग्रन्थाः सन्ति। मम गृहस्य (सौध) _____ अस्माकम् एकम् उद्यानं वर्तते । तद् उद्यानं नाम मम गृहस्य शोभा।



**कृतिः-** एवं छात्राः शिक्षकसाहाय्येन मम शिक्षकः, शाला, माता, पिता, मित्रम् इति विषयान् अधिकृत्य स्वयं वाक्यानि रचयन्ति, कथयन्ति, लिखन्ति च ।

## भाषासूत्रम् – २

### नामानि–१

- **नाम–** वस्तु–स्थान–नामदर्शकः शब्दः । यथा सुधाखण्डः, मापिका, शाला, देशः, उमेशः, ज्ञानम् इत्यादयः।
- **प्रातिपदिकम्–** शब्दस्य मूलं रूपम् । यथा देव, वन, माला, अस्मद्, युष्मद् इत्यादयः । वाक्यरचनायां मूलशब्दस्य (प्रातिपदिकस्य) उपयोगः न क्रियते। अपि तु विभक्तियुक्तशब्दानाम् उपयोगः भवति।
- **विभक्तिरूपाणि–** वाक्यार्थानुसारं शब्दानां विविधानि रूपाणि भवन्ति । तानि विभक्तिरूपाणि इति उच्यन्ते ।

१) एषः मम हस्तः । २) शारदायाः हस्ते वीणा शोभते ।

३) हस्तस्य भूषणं दानम् । ४) हस्तात् घटः पतति ।

अत्र 'हस्त' इति प्रातिपदिकस्य हस्तः, हस्ते, हस्तस्य, हस्तात् इति विभक्तिरूपाणि ।

विभक्तयः सप्त–प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी ।

सम्बोधनम् इति पृथक् विभक्तिः न । प्रथमाविभक्तेः रूपाणाम् एव परस्पर–आवाहने प्रयोगः – सम्बोधनम् ।

एवं ८ (७ विभक्तयः+ सम्बोधनम्) × ३ (वचनानि) = २४ नामपदानां विभक्तिरूपाणि भवन्ति ।

| | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| अकारान्तः | देव | --- | वन |
| आकारान्तः | --- | माला | --- |
| इकारान्तः | कवि | मति | वारि |
| ईकारान्तः | --- | नदी | --- |
| उदाहरणानि | दन्त, देश, चमस, चषक, हस्त, वर्ग, स्यूत, दीप, पाद, कर्ण, यति, मुनि, ऋषि, रवि इ. | शाला, विद्या, बाला, कन्या, कथा, कला, क्रीडा, बुद्धि, भूमि, कूपी, लेखनी इ. | जल, व्यजन, पुस्तक, युतक, ज्ञान, आसन, नृत्य, दान, फल, धन, गृह, भूरि इ. |

**'अ'कारान्तं पुंलिङ्गं नाम देव (देव = द् + ए + व् + अ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| देवः | देवौ | देवाः | प्रथमा |
| देवम् | देवौ | देवान् | द्वितीया |
| देवेन | देवाभ्याम् | देवैः | तृतीया |
| देवाय | देवाभ्याम् | देवेभ्यः | चतुर्थी |
| देवात् | देवाभ्याम् | देवेभ्यः | पञ्चमी |
| देवस्य | देवयोः | देवानाम् | षष्ठी |
| देवे | देवयोः | देवेषु | सप्तमी |
| हे देव | हे देवौ | हे देवाः | सम्बोधनम् |

**'अ'कारान्तं नपुंसकलिङ्गं नाम वन (वन = व् + अ + न् + अ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| वनम् | वने | वनानि | प्रथमा |
| वनम् | वने | वनानि | द्वितीया |
| वनेन | वनाभ्याम् | वनैः | तृतीया |
| वनाय | वनाभ्याम् | वनेभ्यः | चतुर्थी |
| वनात् | वनाभ्याम् | वनेभ्यः | पञ्चमी |
| वनस्य | वनयोः | वनानाम् | षष्ठी |
| वने | वनयोः | वनेषु | सप्तमी |
| हे वन | हे वने | हे वनानि | सम्बोधनम् |

नपुंसकलिङ्गशब्दानां तृतीयातः सप्तमीपर्यन्तं पुंलिङ्गशब्दवत् रूपाणि सर्वत्र भवन्ति ।

**'आ'कारान्तं स्त्रीलिङ्गं नाम माला (माला = म् + आ + ल् + आ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| माला | माले | मालाः | प्रथमा |
| मालाम् | माले | मालाः | द्वितीया |
| मालया | मालाभ्याम् | मालाभिः | तृतीया |
| मालायै | मालाभ्याम् | मालाभ्यः | चतुर्थी |
| मालायाः | मालाभ्याम् | मालाभ्यः | पञ्चमी |
| मालायाः | मालयोः | मालानाम् | षष्ठी |
| मालायाम् | मालयोः | मालासु | सप्तमी |
| हे माले | हे माले | हे मालाः | सम्बोधनम् |

## भाषाभ्यासः

### १. रूपपरिचयं लिखत ।

| क्र. | नामरूपम् | प्रातिपदिकम् | अन्तः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| १. | विद्याम् | | | | | |
| २. | युतके | | | | | |
| ३. | कान्तया | | | | | |
| ४. | चषकयोः | | | | | |
| ५. | दीपाभ्याम् | | | | | |
| ६. | दन्तैः | | | | | |
| ७. | कथायाः | | | | | |
| ८. | कलायै | | | | | |

## २. चतुर्थपदं लिखत ।

१. देव-देवेन :: भूप - ____ ।
२. स्यूत-स्यूतानाम् :: चमस - ____ ।
३. फल-फलानि :: पर्ण - ____ ।
४. सूर्य-सूर्यात् :: चन्द्र ____ ।
५. देव-देवेषु :: वन - ____।
६. माला-मालासु :: शाला - ____ ।

## ३. शब्दानाम् अर्थं विभक्त्यनुसारं माध्यमभाषया लिखत ।

१. वृक्षान् २. भार्यायै ३. कराभ्याम् ४. दर्पणे ५. कुञ्चिकया
६. यानात् ७. गीतेषु ८. वृक्षेषु ९. हस्तयो: १०. कर्णाभ्याम्

## ४. तालिकां पूरयत ।

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| | चन्द्रौ | | प्रथमा |
| नेत्रम् | | | द्वितीया |
| मापिकया | | | तृतीया |
| | | दन्तेभ्य: | चतुर्थी |
| | वातायनाभ्याम् | | पञ्चमी |
| गजाननस्य | | | षष्ठी |
| | उत्पीठिकयो: | | सप्तमी |
| | | हे वयस्या: | सम्बोधनम् |

### सर्वनामानि

१) **रमेश:** शालां गच्छति । **स:** शालां गच्छति ।
२) **रमेश:** ग्रन्थं पठति । **स:** ग्रन्थं पठति ।
३) **रमेश:** प्रश्नं पृच्छति । **स:** प्रश्नं पृच्छति ।
४) **रमेश:** गीतं गायति । **स:** गीतं गायति ।
५) **रमेश:** सुरेशं वदति । **स:** सुरेशं वदति ।

'**रमेश:**'- नाम
**स:- सर्वनाम**

नामपदस्य स्थाने प्रयुक्तं पदं 'सर्वनाम' इति उच्यते ।

| उत्तमपुरुषवाचकं सर्वनाम (त्रिषु लिङ्गेषु समानम्) '**अस्मद्**' | | | | मध्यमपुरुषवाचकं सर्वनाम (त्रिषु लिङ्गेषु समानम्) '**युष्मद्**' | | |
|---|---|---|---|---|---|---|
| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| अहम् | आवाम् | वयम् | **प्रथमा** | त्वम् | युवाम् | यूयम् |
| माम्/मा | आवाम्/नौ | अस्मान्/न: | **द्वितीया** | त्वाम्/त्वा | युवाम्/वाम् | युष्मान्/व: |
| मया | आवाभ्याम् | अस्माभि: | **तृतीया** | त्वया | युवाभ्याम् | युष्माभि: |
| मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/न: | **चतुर्थी** | तुभ्यम्/ते | युवाभ्याम्/वाम् | युष्मभ्यम्/व: |
| मत् | आवाभ्याम् | अस्मत् | **पञ्चमी** | त्वत् | युवाभ्याम् | युष्मत् |
| मम/मे | आवयो:/नौ | अस्माकम्/न: | **षष्ठी** | तव/ते | युवयो:/वाम् | युष्माकम्/व: |
| मयि | आवयो: | अस्मासु | **सप्तमी** | त्वयि | युवयो: | युष्मासु |

## प्रथमपुरुषवाचकानि सर्वनामानि

### तद्

| तद् पुंलिङ्गम् | | | तद् स्त्रीलिङ्गम् | | | तद् नपुंसकलिङ्गम् | | | |
|---|---|---|---|---|---|---|---|---|---|
| ए. व. | द्विव. | ब. व. | ए. व. | द्विव. | ब. व. | ए.व. | द्विव. | ब. व | विभक्तिः |
| सः | तौ | ते | सा | ते | ताः | तत्-तद् | ते | तानि | प्रथमा |
| तम् | तौ | तान् | ताम् | ते | ताः | तत्-तद् | ते | तानि | द्वितीया |
| तेन | ताभ्याम् | तैः | तया | ताभ्याम् | ताभिः | तेन | ताभ्याम् | तैः | तृतीया |
| तस्मै | ताभ्याम् | तेभ्यः | तस्यै | ताभ्याम् | ताभ्यः | तस्मै | ताभ्याम् | तेभ्यः | चतुर्थी |
| तस्मात् | ताभ्याम् | तेभ्यः | तस्याः | ताभ्याम् | ताभ्यः | तस्मात् | ताभ्याम् | तेभ्यः | पञ्चमी |
| तस्य | तयोः | तेषाम् | तस्याः | तयोः | तासाम् | तस्य | तयोः | तेषाम् | षष्ठी |
| तस्मिन् | तयोः | तेषु | तस्याम् | तयोः | तासु | तस्मिन् | तयोः | तेषु | सप्तमी |

अवबोधत – सर्वनामपदानां सम्बोधनविभक्तिः न भवति ।

'तद्' सर्वनामवत् एव 'यद्', 'एतद्' तथा 'किम्' एतेषां रूपाणि भवन्ति ।

| | पुंलिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| | ए.व. | द्विव. | ब.व. | ए. व. | द्वि.व. | ब. व. | ए. व. | द्विव. | ब. व. |
| यद् | यः | यौ | ये | या | ये | याः | यद् | ये | यानि |
| एतद् | एषः | एतौ | एते | एषा | एते | एताः | एतत्/एतद् | एते | एतानि |
| किम् | कः | कौ | के | का | के | काः | किम् | के | कानि |

## भाषाभ्यासः

**१. मेलनं कुरुत ।**

| विभक्तिः | रूपम् |
|---|---|
| प्रथमा | यासाम् |
| द्वितीया | काभिः |
| तृतीया | एतस्मै |
| चतुर्थी | माम् |
| पञ्चमी | मत् |
| षष्ठी | त्वयि |
| सप्तमी | तानि |

**२. योग्यरूपं लिखत ।**

१. _____ (एतद्) मम हस्तौ ।

२. अरे बालक, किं _____ (युष्मद्) नाम ।


३. _____(यद्) हस्ते शस्त्रं _____(तद्) सैनिकः।

४. _____(अस्मद्) सर्वे भारतीयाः ।

५. _____(तद्) नगरे प्राणिसङ्ग्रहालयः वर्तते ।

**नामसर्वनामपदानां सर्वाणि विभक्तिरूपाणि उच्चैः पठत कण्ठस्थीकुरुत च ।**

## पठत–बोधत



छात्र: अस्ति । छात्रा: सन्ति ।
दन्त: अस्ति । दन्ता: सन्ति ।
केश: अस्ति केशा: सन्ति ।
चरण: अस्ति । चरणौ स्त: ।
हस्त: अस्ति । हस्तौ स्त: ।
अहं छात्र: अस्मि । वयं छात्रा: स्म: ।
त्वं बालक: असि । यूयं बालका: स्थ ।
बालक: पठनं करोति ।
बालका: पठनं कुर्वन्ति ।
कुम्भकार: कुम्भान् करोति ।
कुम्भकारा: कुम्भान् कुर्वन्ति ।
लवकुशौ गायनं कुरुत: ।
पाण्डवा: दानं कुर्वन्ति ।

### अस् (प.प.) लट्लकार:

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | अस्ति | स्त: | सन्ति |
| म. पु. | असि | स्थ: | स्थ |
| उ. पु. | अस्मि | स्व: | स्म: |

### कृ (प. प.) लट्लकार:

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | करोति | कुरुत: | कुर्वन्ति |
| म. पु. | करोषि | कुरुथ: | कुरुथ |
| उ. पु. | करोमि | कुर्व: | कुर्म: |

'अस्' तथा 'कृ' एतयो: उपयोगं कृत्वा पञ्चदशवाक्यानि वदत ।

## भाषाभ्यास:

**१. रूपपरिचयं लिखत ।**

| क्र. | सर्वनामरूपम् | प्रातिपदिकम् | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|---|
| १. | मह्यम् | | | | |
| २. | युवयो: | | | | |
| ३. | एतासु | | | | |
| ४. | येन | | | | |
| ५. | तस्यै | | | | |

**२. प्रातिपदिकस्य योग्यं रूपं योजयित्वा वाक्यं पुन: लिखत ।**

१. योगेश: (सुधाखण्ड) लिखति ।
२. (दुग्ध) वर्ण: शुभ्र: ।
३. संस्कृतभाषा (अस्मद्) प्राचीनभाषा ।
४. (किम्) नाम दीपेश: ?
५. अहम् (उपनेत्र) पश्यामि ।

# ११. क्रियापदस्य सहचराः । (तृतीयः घटकः)

पठामि, लिखामि, यच्छामि, पश्यामि एतानि पदानि क्रियां दर्शयन्ति । अतः तानि क्रियापदानि । वाक्ये क्रियापदस्य नैके सहचराः । जानीमः तान् सर्वान् ।



अत्र का क्रिया?–लेखनम् ।
कः लिखति ।
गौरवः लिखति । गौरवः इति कर्ता ।
गौरवः किं लिखति?
गौरवः निबन्धं लिखति । निबन्धम् इति कर्म ।
गौरवः केन निबन्धं लिखति?
गौरवः लेखन्या निबन्धं लिखति । लेखनी इति साधनं करणं वा ।



सानिका किं यच्छति?
सानिका लेखनपुस्तिकां यच्छति । लेखनपुस्तिकाम् इति कर्म ।
सानिका कस्मै लेखनपुस्तिकां यच्छति?
सानिका अध्यापकाय लेखनपुस्तिकां यच्छति ।
अध्यापकाय इति सम्प्रदानम् ।



सानिका गौरवः च किं पश्यतः?
सानिका गौरवः च आम्रफलं पश्यतः ।
आम्रफलम् इति ________ ।
आम्रफलं कस्मात् पतति?
आम्रफलं वृक्षात् पतति । वृक्षात् इति अपादानम् ।
आम्रफलं कुत्र पतति?
आम्रफलम् अङ्गणे पतति ।
अङ्गणे इति अधिकरणम् ।

कर्ता–कर्म–करणं–सम्प्रदानम्–अपादानम्–अधिकरणम् च इत्येते सर्वे वाक्ये क्रियापदस्य सहचराः ।
ते सर्वे मिलित्वा क्रियां कुर्वन्ति । अतः तानि कारकाणि ।

| कारकम् | विभक्तिः | उदाहरणम् |
|---|---|---|
| कर्ता | प्रथमा | **रमा** गीतं गायति । |
| कर्म | द्वितीया | मधुरा **जलं** पिबति । |
| करणम् | तृतीया | अहं **सुधाखण्डेन** लिखामि । |
| सम्प्रदानम् | चतुर्थी | माता **बालकाय** क्रीडनकं यच्छति । |
| अपादानम् | पञ्चमी | नृपः **रथात्** अवतरति । |
| ----- | षष्ठी(सम्बन्धः) | **दशरथस्य** पुत्रः रामः । |
| अधिकरणम् | सप्तमी | धेनुः **गोष्ठे** तिष्ठति । |

## भाषाभ्यासः

१. **अधोरेखितानां शब्दानां कारकं लिखत माध्यमभाषया अनुवादं कुरुत च ।**

१) **आदित्यः** गीतं गायति ।
२) बालकाः **उद्याने** क्रीडन्ति ।
३) **अहं** देवं प्रणमामि ।
४) त्वं **छुरिकया** फलं कर्तयसि ।
५) उल्का **अवकाशात्** पतति ।
६) मुख्याध्यापकः **छात्रेभ्यः** **पारितोषिकाणि** यच्छति ।
७) वयं **चित्रपटं** पश्यामः ।
८) **पितामहः** **प्रभाते** वृत्तपत्रं पठति ।
९) **गिर्यारोहकः** **शिखरात्** **यष्टिकाभ्याम्** अवतरति ।

२. **योग्यविभक्तिरूपं योजयत ।**


१. युवकः (वित्तकोष) _______ धनम् आनयति ।
२. आपणिकः (तुला) _______ धान्यं तोलयति ।
३. भ्राता (भगिनी) _______ शाटिकां यच्छति ।
४. पितामहः (देव) _______ पूजयति ।
५. (प्रदर्शिनी) _______ चित्राणि सन्ति ।

३. **योग्यं पर्यायं चिनुत ।**

१. छात्रः श्लोकः/श्लोकं स्मरति ।
२. रक्षकः क्रोधेन/क्रोधाय चोरं ताडयति ।
३. शिक्षकः छात्रेभ्यः/छात्रैः पुस्तकानि यच्छति ।
४. वाटिकायां/वाटिकायाः जलधारायन्त्रम् अस्ति ।
५. आकाशे/आकाशात् तारकाः पतन्ति ।
६. मन्त्रिमहोदयः कार्यक्रमस्य/कार्यक्रमम् उद्घाटयति ।

I7LXJ7

४. **उचितविभक्तिप्रयोगेण वाक्यं रचयत ।**




५. **विभिन्न-कारकाणाम् उपयोगं कृत्वा यच्छति, ग्रथति, क्षिपति, पठति इत्यादीनां क्रियापदानां साहाय्येन दीर्घाणि वाक्यानि रचयत ।**

# १२. आत्मनेपदीया ।

अपूर्व: कोऽपि कोषोऽयं **विद्यते** तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥१॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं **प्रपद्ये** ॥२॥

कुसुमं वर्णसम्पन्नं गन्धहीनं न **शोभते** ।
न **शोभते** क्रियाहीनं मधुरं वचनं तथा ॥३॥

शतेषु **जायते** शूर: सहस्रेषु च पण्डित: ।
वक्ता दशसहस्रेषु दाता भवति वा न वा ॥४॥

लोभाविष्टो नरो वित्तं **वीक्षते** न तु सङ्कटम् ।
दुग्धं पश्यति मार्जारो न तथा लगुडाहतिम् ॥५॥

अपारे काव्यसंसारे कविरेक: प्रजापति: ।
यथास्मै **रोचते** विश्वं तथा वै **परिवर्तते** ॥६॥

वनस्पतेरपक्वानि फलानि प्रचिनोति य: ।
**विन्दते** न रसं तेभ्यो बीजं चापि विनश्यति ॥७॥

न देवो **वर्तते** काष्ठे न पाषाणे न मृण्मये ।
भावे हि **विद्यते** देव: तस्माद् भावो हि कारणम् ॥८॥

## भाषाभ्यास:

**श्लोक:-१**

१. श्लोके आ. प. क्रियापदं किम्?


२. अधोदत्तानां शब्दानां कृते श्लोके आगतान् शब्दान् लिखत ।
सरस्वती- अद्वितीय:-

३. विरुद्धार्थकशब्दं लिखत ।
व्यय: × ____ ।
वृद्धि: × ____ ।

**श्लोकः–२**

१. श्लोके क्रियापदं किम्?

२. जालरेखाचित्रं पूरयत ।




**श्लोकः–३**

१. श्लोके क्रियापदं किम्?

२. विशेषण-विशेष्य-सम्बन्धः –

१) 'कुसुमम्' इत्यस्य द्वे विशेषणे लिखत ।

२) 'वचनम्' इत्यस्य द्वे विशेषणे लिखत ।

३. श्लोकात् समानार्थकशब्दान् चिनुत ।

१) प्रसूनम्, सुमम्, पुष्पम् – ☐

२) वचः, उक्तिः, वाक्यम् – ☐

**श्लोकः–४**

१. स्तम्भमेलनं कुरुत ।

| 'अ' | 'ब' |
|---|---|
| शतेषु | दाता |
| सहस्रेषु | शूरः |
| दशसहस्रेषु | पण्डितः |
| | वक्ता |

२. कस्मिन् कः गुणः वर्तते? इति लिखत ।

अ – शूरे, पण्डिते, भाषणनिपुणे, उदारे

ब – दातृत्वम्, वक्तृत्वम्, पाण्डित्यम्, शौर्यम्

३. समानार्थकशब्दान् लिखत ।

दाता, शूरः, पण्डितः

**श्लोकः–५**

१. मञ्जूषायाः आधारेण स्तम्भपूरणं कुरुत ।

| | वीक्षते । | न वीक्षते । |
|---|---|---|
| नरः | | |
| मार्जारः | | |

(सङ्कटम्, दुग्धम्, वित्तम्, लगुडाहतिम्)

२. नरस्य विशेषणं किम्?

३. समानार्थकशब्दान् लिखत ।

नरः, वित्तम्, वीक्षते, सङ्कटम्, दुग्धम्, मार्जारः, लगुडः, आहतिः ।

**श्लोकः–६**

एकवाक्येन उत्तरत ।

१. श्लोके क्रियापदे के ?

२. अपारे काव्यसंसारे कः प्रजापतिः ?

**श्लोकः–७**

१. विशेषणं लिखत । ---- फलानि ।

२. सुभाषिते आ. प. क्रियापदं किम्?

३. सत्यं वा असत्यं लिखत ।

अ) मनुजः अपक्वेभ्यः फलेभ्यः रसं विन्दते ।

आ) अपक्वफलानि चित्वा बीजस्य विनाशः भवति ।


**श्लोकः–८**

१. देवः कुत्र वर्तते?

२. देवः, काष्ठम्, पाषाणः इति शब्दानाम् अमरकोषपङ्क्तीः लिखत ।

३. जालरेखाचित्रं पूरयत ।

सप्तम्यन्तपदानि




- **सर्वेषां सुभाषितानां सरलार्थं माध्यमभाषया लिखत ।**
- **सर्वेषां सुभाषितानां स्पष्टीकरणं माध्यमभाषया लिखत ।**

## पञ्चदश वाक्यानि । (आत्मनेपदम्)

१. सः बालकः भाषते ।   २ तौ बालकौ भाषेते ।   ३ ते बालकाः भाषन्ते ।
१ सा कन्या भाषते ।   २ ते कन्ये भाषेते ।   ३ ताः कन्याः भाषन्ते ।
१ तद् अपत्यं भाषते ।   २ ते अपत्ये भाषेते ।   ३ तानि अपत्यानि भाषन्ते ।
४ त्वं भाषसे ।   ५ युवां भाषेथे ।   ६ यूयं भाषध्वे ।
७ अहं भाषे ।   ८ आवां भाषावहे ।   ९ वयं भाषामहे ।

अधोदत्तानि उदाहरणानि पठन्तु। कतिचन-उदाहरणेषु 'न'कारः विद्यते, कतिचन-उदाहरणेषु 'ण'कारः भवति। यथा

| | तृतीया एकवचनम् | षष्ठी बहुवचनम् |
|---|---|---|
| देव | देवेन | देवानाम् |
| नेत्र | **नेत्रेण** | **नेत्राणाम्** |
| हस्त | हस्तेन | हस्तानाम् |
| सूर्य | **सूर्येण** | **सूर्याणाम्** |

### नकारस्य णकारः कदा भवति ?

| ऋ / र् / ष् | + | क वर्गः / प वर्गः / य्/व्/ह् / कोऽपि स्वरः | + | **न = ण** |
|---|---|---|---|---|

र् + आ + म् + ए + न् + अ = रामेण
र् + आ + म् + आ + न् + आ + म् = रामाणाम्
ऋ + क् + ष् + ए + न् + अ = ऋक्षेण
ऋ + क् + ष् + आ + न् + आ + म् = ऋक्षाणाम्

| ऋ / र् / ष् | + | च वर्ग/ ट वर्ग/ त वर्ग/ल्, श्, स् | + | **न = न** |
|---|---|---|---|---|

र् + अ + ज् + अ + क् + ए + न् + अ = रजकेन
र् + अ + ज् + अ + क् + आ + न् + आ + म् = रजकानाम्
व् + ऋ + ष् + अ + ल् + ए + न् + अ = वृषलेन
व् + ऋ + ष् + अ + ल् + आ + न् + आ + म् = वृषलानाम्

**अधोदत्तानां शब्दानां तृतीया विभक्तेः एकवचनरूपाणि/षष्ठी विभक्तेः बहुवचनरूपाणि लिखत ।**

| | | |
|---|---|---|
| वराह = | वस्त्र = | क्रीडा = |
| गृह = | प्रजा = | स्पर्श = |
| स्तोत्र = | कर्ण = | वृक्ष = |
| राक्षस = | अमर्त्य = | स्नुषा = |
| तारा = | राधा = | भाषा = |
| सूत्र = | तक्षक = | पुष्प = |


I7VTKU

# १३. अश्वस्य स्वामिनिष्ठा ।



मध्याह्नसमय: । सर्वत्र नीरवता । मार्ग: अपि निर्मनुष्य: । तदा एव कोऽपि अश्व: मार्गे धावति । तस्य एक: पाद: व्रणित: । स: कष्टेन वेदनां सहते । तथापि त्रिभि: पादै: यथाकथमपि स: धावति । तस्य पृष्ठे उपविष्ट: अस्ति तस्य स्वामी। तस्य स्वामी शस्त्रप्रहारै: व्रणित: ।

अविरतं धावनेन अश्व: अतीव श्रान्त: जायते। स: वेगेन धावितुम् असमर्थ: भवति। अत: मन्दं धावितुं प्रारभते । परं नैव विरमति स: । ''अधुना ग्राम: समीपे एव । तत्र स्वामिनं नयामि संरक्षामि च। परं मार्गे विस्तीर्ण: जलप्रवाह: । अधुना किं करणीयम्?'' इति चिन्तयति अश्व: । क्षीण: व्रणित: च अश्व: तम् उल्लङ्घयितुम् असमर्थ: । किन्तु समय: अल्प: । कथमपि प्राणान् अविगणय्य स: जलप्रवाहम् उल्लङ्घयति । अपरतीरं गत्वा भूमौ पतति । तेन आघातेन स्वामी अपि भूमौ निपतति । किञ्चित्कालानन्तरं स्वामी संज्ञां लभते । स: अश्वस्य समीपे आगच्छति । स्नेहेन अश्वस्य शरीरं स्पृशति । भूमौ पतित: अश्व: अपि स्वामिनं पश्यति समाधानेन प्राणान् त्यजति च ।



क: एष: नृप:? ज्ञायते वा? स: एव महाराणाप्रताप: । राजस्थानराज्यस्य मेवाडप्रदेशस्य नृपश्रेष्ठ: । क: एष: स्वामिभक्त: अश्व:? एष: चेतक: नाम अश्व: । अश्वेषु आदर्शभूत: स: । तस्य स्मृत्यर्थं निर्मितं समाधिस्थलं मेवाडप्रान्ते विराजते ।

धन्य: स्वामी राणाप्रताप: धन्य: च स्वामिभक्त: अश्व: चेतक: ।

**(कविकुलगुरु–कालिदास–संस्कृतविश्वविद्यालयेन प्रकाशिताया: संस्कृतबालसाहित्यमालाया: आधारेण इयं कथा ।)**

## भाषाभ्यास:

**१. एकवाक्येन उत्तरत ।**

१. मार्ग: कीदृश:?
२. अश्वस्य पृष्ठे क: उपविष्ट: अस्ति?
३. अश्व: किम् उल्लङ्घयति?
४. स्वामी किं स्पृशति?

I85PMH

**२. प्रश्ननिर्माणं कुरुत ।**

१. स्वामी अश्वस्य समीपे आगच्छति ।
२. स्वामी भूमौ निपतति ।

**३. योग्य विभक्तिरूपं लिखत ।**

१. तस्य ____(पृष्ठ) उपविष्ट: अस्ति तस्य स्वामी ।
२. तस्य एक: पाद: ____ (व्रणित) ।
३. समाधिस्थलं ____ (मेवाडप्रान्त) विराजते ।
४. अश्व: ____ (समाधान) प्राणान् त्यजति ।

**४. आत्मनेपदिक्रियापदानि चित्वा लिखत ।**

**५. माध्यमभाषया उत्तरं लिखत ।**

१. 'पशुपक्षिण: मानवस्य साहाय्यं कुर्वन्ति ।' इति विषये का: कथा: यूयं जानीथ?

# १४. संवादकौशलम् ।

## शाकापणः ।

विक्रेता– आगच्छतु आगच्छतु । शाकानि क्रीणातु । आगच्छतु आगच्छतु ।

गृहिणी– अयि भोः, कानि कानि शाकानि विद्यन्ते?

विक्रेता– अस्ति अत्र कारवेल्लम्, कर्कटी, भिण्डिः, इदमिदानीम् आगतं प्रत्यग्रं वृन्ताकं, रक्तवर्णं गृञ्जनकं च । किम् इच्छति?

गृहिणी– किं मूल्यम् आलुकस्य ।

विक्रेता– न अधिकं भोः, केवलं विंशतिः रूप्यकाणि प्रतिकिलोमितम् ।

गृहिणी– अस्तु, किलोपरिमितं यच्छतु । भिण्डिः अपि अर्धकिलोमितम् ।

विक्रेता– अवश्यम् । इतोऽपि किम् आवश्यकम् ? शीघ्रं वदतु ।

गृहिणी– कर्कटीं यच्छतु, अर्धकिलोपरिमितं वृन्ताकं च। दशरूप्यकमूल्यमिताः मरीचिकाः अपि यच्छतु ।

विक्रेता– अपि स्यूतः आनीतः?

गृहिणी– न भोः! प्लास्टिकस्यूतं ददातु ।

विक्रेता – क्षम्यताम् । प्लास्टिक–उपयोगः प्रदूषणकारकः । अहं प्लास्टिकस्यूतं न स्थापयामि एव ।

गृहिणी – अधुना किं करणीयम् ?

विक्रेता – वस्त्रस्यूतम् अपि क्रीणातु । मूल्यं केवलं पञ्चरूप्यकाणि ।

गृहिणी – बहु उत्तमम् । ददातु । अधुना मूल्यं कथयतु ।

विक्रेता– आलुकस्य विंशतिः रूप्यकाणि, भिण्ड्याः पञ्चविंशतिः रूप्यकाणि, कर्कट्याः पञ्चदश रूप्यकाणि, वृन्ताकस्य विंशतिः रूप्यकाणि, दश रूप्यकाणि मरीचिकायाः, वस्त्रस्यूतस्य पञ्चरूप्यकाणि । आहत्य पञ्चनवतिः रूप्यकाणि।

गृहिणी– अस्तु । शतरूप्यकाणां धनपत्रं यच्छामि । अवशिष्टस्य धनस्य आर्द्रकं यच्छतु ।

विक्रेता– अस्तु ।



## कार्यालयः ।

**(प्रविश्य)**

लिपिकः:- अरे सुरेश, मम उत्पीठिकायां सर्वं विकीर्णम् अस्ति । किम् इदम्?

सेवकः:- किम् अभवत्?

लिपिकः:- मम लेखनी, अङ्कनी, मापिका, सञ्चिका च स्वस्थाने न सन्ति ।

सेवकः:- क्षम्यताम् । इदानीं यच्छामि ।

लिपिकः:- कर्गजानां समूहः अपि इतस्ततः अभवत् ।

सेवकः:- महोदय, व्यजनवायुना कर्गजाः इतस्ततः अभवन् ।

लिपिकः:- मम लेखनपुस्तिका अपि अत्र नास्ति ।

सेवकः:- आम् । सा तु मम समीपे अस्ति । ह्यः एव सङ्गणके टङ्कनार्थं भवान् मह्यम् अयच्छत् ।

लिपिकः:- अस्तु । अधुना उत्पीठिकायां सर्वाणि उपकरणानि सम्यक् स्थापय । पुनःपूरण्यां मसी न्यूना । नूतनां पुनःपूरणीम् अपि आनय ।

सेवकः:- तथा करोमि । इतोऽपि किमपि आवश्यकम्?

लिपिकः:- मास्तु । सर्वं सिद्धम् । अधुना कार्यारम्भं करोमि ।

I8EKP5

## भाषाभ्यासः

१. युष्माकं प्रियशाकानां नामानि लिखत ।

२. प्रथमसंवादस्य आधारेण देयकं पूरयत ।

| वाटिका (शाकापणः)<br>रविनगरम्, आम्बेगाव -३० | | |
|---|---|---|
| **अनु. क्र.** | **विवरणम्** | **मूल्यम्** |
| १. | आलुकम् | ______ |
| २. | ______ | २५ |
| ३. | मरीचिकाः | ______ |
| ४. | कर्कटी | ______ |
| ५. | ______ | २० |
| ६. | वस्त्रस्यूतः | ______ |
| ७. | आर्द्रकम् | ______ |
| | आहत्य | ______ |
| धन्यवादः । आपणिकस्य हस्ताङ्कनम् ................ | | |



## लेखनकौशलम्
## संवादलेखनम्

१. संवादलेखनम् - मित्रमेलनम् (द्वयोः), यानपृच्छा, मार्गपृच्छा

२. शाकापणसंवादस्थाने धान्यापणसंवादं लिखत । (उपयुक्तशब्दसङ्ग्रहः-धान्यानि-तण्डुलः, गोधूमः, तुवरः, मुद्गः, माषः, मसुरः, चणकः )

३. द्वितीयसंवादे बहूनां वस्तूनाम् उपकरणानां च उल्लेखः अस्ति । इतोऽपि बहूनां वस्तूनां यूयम् उपयोगं कुरुत। तेषां संस्कृतनामानि अन्विष्य वर्गसंवादं लिखत ।

# १५. आधुनिकप्रहेलिका: ।

– श्रीमती दुर्गा पारखी

**प्रहेलिकाया: अर्थं ज्ञात्वा श्लोकं योग्यचित्रेण सह मेलयत ।**

१. चित्रवर्णोऽथवा शुभ्र: एककर्ण: सुदर्शन: ।
भवेत्कथं हि युष्माकं चायपानं मया विना ।।

२. निर्वाता द्विमुखी दीर्घा लघुभारा सुवाहिका ।
पात्रस्पर्शं विना पेयं पाययामि सुसेविका ।।


३. आरुह्य नासिकां नित्यं स्पृशामि श्रवणद्वयम् ।
दृष्ट्यर्थं मम साहाय्यं काचयुक्ता तनुर्मम ।।

४. स्वयं प्रसारिते जाले आपतन्ति नरा: स्वयम् ।
लभन्ते सुखनिद्रां ते अहो आश्चर्यमद्भुतम् ।।


५. एकाकी द्वारि तिष्ठामि गृहपतौ बहिर्गते ।
गृहरक्षाकर: शूरो लघुमूर्ति: सुकीर्तिमान् ।।

६. कृष्णमुखी च गौराङ्गी पेटिकायां निवासिनी ।
अग्निं वमति शीघ्रं हि घृष्टा पेटिकया सह ।।

७. भारं वोढुं न मे दु:खं न मे दु:खं कुभोजने ।
एतत्तु मे महादु:खं मूर्खेण सह तोलनम् ।।


ताल:


उपनेत्रम्


मशकजालम्


चायचषक:


नलिका



गर्दभ:


अग्निशलाका


१. **श्लोकं पठित्वा अर्थम् अन्विष्यत । सरलार्थं लिखत ।**

१) निमील्य नेत्रे पिबामि दुग्धम् ।
मूषकशत्रु: कथयत कोऽहम् ।।
२) वृक्षात् वृक्षं कूर्दे सततम् ।
धरामि पुच्छं कथयत कोऽहम् ।।
३) नासिकयाऽहं पिबामि तोयम् ।
विशालकाय: कथयत कोऽहम् ।।
४) भषामि रात्रौ दृष्ट्वा चौरम् ।
वक्रपुच्छक: कथयत कोऽहम् ।।
५) मेघं दृष्ट्वा करोमि नृत्यम् ।
विस्तृतपिच्छ: कथयत कोऽहम् ।।


– सम्पदानन्दमिश्र:



२. **चित्रवर्णनं कुरुत । प्रहेलिकां रचयत ।**



मम वर्ण: हरित: ।
............... मम प्रियं खाद्यम् ।
मम चञ्चु: रक्ता ।
अहं क:? _______ ।।




अहं छायां ....... ।
अहं ....... यच्छामि ।
अहं ....... अपि यच्छामि ।
अहं क:? _______ ।।



मम वर्ण: ....... ।
किन्तु अहं ....... काक: ।
अहं मधुरं ....... ।
अहं वृक्षे ....... ।
अहं क:? _______ ।।

I8NGQS



मम वर्ण: ...... ।
अहम्....... विहरामि ।
अहं....... यच्छामि ।
अहं क:? _______ ।।

## लेखनकौशलम्
## निबन्धः/अनुवादः



**१. उचितं पर्यायं चित्वा निबन्धं पूरयत ।**

अ) **श्रीगणेशः** । श्रीगणेशः (विद्यायाः/धनस्य) देवता । श्रीगणेशः बुद्धिं (यच्छन्ति/यच्छति)। श्रीगणेशस्य (माता/पिता) शङ्करः । कार्तिकेयः अस्य भ्राता (अस्ति/नास्ति) । (श्रीगणेशस्य/श्रीगणेशाय) मोदकाः रोचन्ते । (श्रीगणेशं/श्रीगणेशाय) नमः ।

ब) **मम शाला** । सरस्वती-विद्यालयः इति (मह्यं/मम) शाला । अहम् अष्टमीकक्षायां (पठति/पठामि) । मम शाला (नगरे/नगरात्) अस्ति। मम शालायां बहूनि पुस्तकानि (विद्यते/विद्यन्ते) । सर्वे (छात्राः/छात्राणां) अध्ययनप्रियाः सन्ति। (मम/मह्यं) पाठशाला अतीव रोचते ।

क) **मयूरः** । मयूरः वर्षाकाले (नृत्यामि/नृत्यति) । तस्य नृत्यम् अतीव (रमणीयं/तापकारकं) वर्तते । जलपूर्णं मेघं (आकाशात्/आकाशे) दृष्ट्वा सः नृत्यति । सः शारदादेव्याः वाहनम् (अस्ति/नास्ति) । सः (राष्ट्रियः/राष्ट्रिया) खगः इति प्रसिद्धः।

ड) **संस्कृतभाषा** । संस्कृतभाषा अतीव (प्राचीना/नूतना) भाषा । (देवानां/देवैः) भाषा इति तस्याः ख्यातिः । ऋग्वेदः, सामवेदः, यजुर्वेदः, अथर्ववेदः च संस्कृतभाषायाः (भूषणानि/भूषणानाम्) एव । संस्कृतभाषायां बहूनि सुभाषितानि (अस्ति/सन्ति) । संस्कृतभाषायाः अभ्यासेन वाणी (निर्दोषा/सदोषा) भवति । संस्कृतभाषा (मम/मयि) प्रिया भाषा अस्ति ।

इ) **आम्बेडकरमहोदयः** । भीमराव-रामजी-आम्बेडकर-महोदयः भारतीयसंविधानस्य (निर्माणम्/निर्माणस्य) अकरोत्। मध्यप्रदेशे जातः सः (बाल्याय/बाल्ये) अतीव कष्टमन्वभवत् । सः विदेशं गत्वा बॅरिस्टर इति उपाधिम् (अलभत/अलभत्) । तदनन्तरं सः (स्वदेशे/स्वदेशं) प्रत्यागच्छत् । संस्कृतभाषा एव भारतस्य प्रमुखा, (प्राचीनः/प्राचीना) भाषा इति सः अमन्यत।

२. **संस्कृतेन अनुवादं कुरुत ।** अनुवादस्य कृते क्यु.आर (Q.R.) माध्यमेन स्वस्वभाषानुसारं परिच्छेदं स्वीकुरुत ।



## पठत-बोधत






एषा छत्रपतिशिवरायस्य राजमुद्रा । मुद्रायां मुद्रित-श्लोकः ईदृशः-

"प्रतिपच्चन्द्रलेखेव वर्धिष्णुर्विश्ववन्दिता ।
शाहसूनोः शिवस्यैषा मुद्रा भद्राय राजते ।।"

अस्य श्लोकस्य अर्थः-

(शाहसूनोः) (शहाजिमहाराजस्य पुत्रस्य शिवस्य) छत्रपतिशिवरायस्य (प्रतिपच्चन्द्रलेखा इव वर्धिष्णुः) यथा प्रतिपदः चन्द्रलेखा प्रतिदिनं वर्धते तथा वर्धमाना, (विश्ववन्दिता) विश्वस्य कृते वन्दनीया (मुद्रा) राजमुद्रा (भद्राय) कल्याणाय (राजते) शोभते । इति ।

अद्य अपि एषा मुद्रा प्राचीनग्रन्थालयेषु पुस्तकेषु संग्रहालयेषु च द्रष्टुं शक्यते ।

# भाषासूत्रम् – ३

## क्रियापदानि–२

## लट्लकारः (वर्तमानकालः) आत्मनेपदम्

**भाष् (१ आ.प.)**

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्रथमपुरुषः | भाषते १ | भाषेते २ | भाषन्ते ३ |
| मध्यमपुरुषः | भाषसे ४ | भाषेथे ५ | भाषध्वे ६ |
| उत्तमपुरुषः | भाषे ७ | भाषावहे ८ | भाषामहे ९ |

**आ. प. प्रत्ययाः**

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | ते १ | इते २ | अन्ते ३ |
| म. पु. | से ४ | इथे ५ | ध्वे ६ |
| उ.पु. | इ ७ | वहे ८ | महे ९ |

क्रियापदसूत्रम् –

(मूलधातुः + गणविकरणम्) = धात्वङ्गम् + प्रत्ययः = क्रियापदम्
(आदेशः) (चिह्नम्)

| गणः | विकरणम् | उदाहरणम् |
|---|---|---|
| प्रथमः | अ | भाषते |
| चतुर्थः | य | युध्यते |
| षष्ठः | अ | दिशते |
| दशमः | अय | पूजयते |

भाषते = भाष् + अ + ते

भाष् ↓ मूलधातुः, अ ↓ गणविकरणम्, ते ↓ प्रत्ययः

वन्द् (१ आ.प.) = वन्द् + अ = वन्द + ते = वन्दते

युध् (४ आ.प.) = युध् + य = युध्य + ते = युध्यते

दिश् (६ आ.प.) = दिश् +अ = दिश + ते = दिशते

पूज् (१० आ.प.) = पूज् +अय = पूजय + ते = पूजयते

वन्द् १ आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | वन्दते | वन्देते | वन्दन्ते |
| म. पु. | वन्दसे | वन्देथे | वन्दध्वे |
| उ.पु. | वन्दे | वन्दावहे | वन्दामहे |

युध् ४ आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | युध्यते | युध्येते | युध्यन्ते |
| म. पु. | युध्यसे | युध्येथे | युध्यध्वे |
| उ.पु. | युध्ये | युध्यावहे | युध्यामहे |

दिश् ६ आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | दिशते | दिशेते | दिशन्ते |
| म. पु. | दिशसे | दिशेथे | दिशध्वे |
| उ.पु. | दिशे | दिशावहे | दिशामहे |

पूज् १० आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | पूजयते | पूजयेते | पूजयन्ते |
| म. पु. | पूजयसे | पूजयेथे | पूजयध्वे |
| उ.पु. | पूजये | पूजयावहे | पूजयामहे |

कृ आ.प. लट्लकारः

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | कुरुते | कुर्वाते | कुर्वते |
| म. पु. | कुरुषे | कुर्वाथे | कुरुध्वे |
| उ.पु. | कुर्वे | कुर्वहे | कुर्महे |


केचन धातवः परस्मैपदिनः (उदा. गच्छति, पठति), केचन धातवः आत्मनेपदिनः (उदा. वन्दते, भाषते), केषाञ्चन धातूनां परस्मैपदरूपाणि तथा आत्मनेपदरूपाणि अपि भवन्ति अतः ते धातवः उभयपदिनः(उदा.बोधति/बोधते, क्षिपति/क्षिपते दिशति/दिशते, करोति/कुरुते, पूजयति/पूजयते)

## उपसर्गाः ।


चौरः अजां हरति ।


बालकः उद्याने विहरति ।


वीरः शत्रुं प्रहरति ।




'हृ' धातोः एव एतानि रूपाणि ।

- अत्र सम्, आ, वि, प्र, इत्यादयः शब्दांशाः धातोः पूर्वं दृश्यन्ते । एते एव उपसर्गाः ।
- उपसर्गाः २२ सन्ति । (प्र, अप, उप, अव) (परा, आ) (परि, अधि, अपि, अति, वि, अभि, प्रति, नि) (सु, अनु) (सम्, उद्, निस्, निर्, दुस्, दुर्)
- उपसर्गकारणात् कदाचित् धातोः अर्थः परिवर्तते । यथा गच्छति-आगच्छति । वदति-प्रतिवदति ।
- उपसर्गाः कदाचित् धातोः अर्थं पोषयन्ति । यथा शोभते-सुशोभते । लसति-विलसति । राजते-विराजते ।

◆ उपसर्गकारणत: कदाचित् धातो: पदपरिवर्तनं भवति । यथा जि-जयति किन्तु वि+जि = विजयते (आ.प.), स्था-तिष्ठति किन्तु प्र+ स्था = प्रतिष्ठते (आ.प.), गम्- गच्छति किन्तु सम्+ गम् = सङ्गच्छते(आ.प.), रम्-रमते किन्तु वि + रम् = विरमति (प.प.)

## भाषाभ्यास:

### १. योग्यम् उपसर्गं योजयत ।


प्र/सम्/वि/परि/अव/आ/अप

१. चौर: धनम् ____ हरति ।
२. भूप: शत्रुं ____ हरति ।
३. वैद्य रोगं ____ हरति ।
४. बालक: उद्याने ____ हरति ।
५. देवी राक्षसं ____ हरति ।
६. जन: पर्वतम् ____ रोहति ।
७. बालिका पर्वतात् ____ रोहति ।

### २. उपसर्गसहितं क्रियापदं लिखत वाक्यं च पूरयत ।

१. माता आपणात् _____ । (आ+गम्-गच्छ्)
२. बालक: देवं ________ । (प्र+नम्)
३. सेविका जलम् ________ । (आ+नी-नय्)
४. रजक: वस्त्राणि _____ । (प्र+क्षल्-क्षाल्)
५. आचार्य: विद्यालयात् ________ (निर्+गम्)
६. शिक्षक: समस्यां________। (परि+हृ-हर्)
७. वानर: वृक्षात् ________ । (उत्+पत्)
८. बाल: जननीम् ________ । (अनु+सृ-सर्)

### ३. उपसर्गसहित-गम् धातो: अर्थं जानीत, स्वभाषया लिखत, वाक्ये प्रयोगं कुरुत च ।




## नामानि - २

**'इ' कारान्तं पुंलिङ्गं नाम 'कवि' (कवि = क् + अ + व् + इ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| कवि: | कवी | कवय: | प्रथमा |
| कविम् | कवी | कवीन् | द्वितीया |
| कविना | कविभ्याम् | कविभि: | तृतीया |
| कवये | कविभ्याम् | कविभ्य: | चतुर्थी |
| कवे: | कविभ्याम् | कविभ्य: | पञ्चमी |
| कवे: | कव्यो: | कवीनाम् | षष्ठी |
| कवौ | कव्यो: | कविषु | सप्तमी |
| हे कवे | हे कवी | हे कवय: | सम्बोधनम् |

कविसदृशा: अन्ये इकारान्ता: पुंलिङ्गशब्दा:-
मुनि, ऋषि, रवि, हरि, पाणि, यति, मारुति, भूपति, कपि, अलि, गिरि, अरि, वह्नि, मणि इत्यादय: ।

**'इ'कारान्तं स्त्रीलिङ्गं नाम मति (मति = म् + अ + त् + इ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| मति: | मती | मतय: | **प्रथमा** |
| मतिम् | मती | मती: | **द्वितीया** |
| मत्या | मतिभ्याम् | मतिभि: | **तृतीया** |
| मतये/मत्यै | मतिभ्याम् | मतिभ्य: | **चतुर्थी** |
| मते:/मत्या: | मतिभ्याम् | मतिभ्य: | **पञ्चमी** |
| मते:/मत्या: | मत्यो: | मतीनाम् | **षष्ठी** |
| मतौ/मत्याम् | मत्यो: | मतिषु | **सप्तमी** |
| हे मते | हे मती | हे मतय: | **सम्बोधनम्** |

मतिसदृशा: अन्ये शब्दा:- भूमि, बुद्धि, प्रीति, कीर्ति, श्रुति, स्मृति, रुचि, शक्ति, धृति, ओषधि, वनस्पति इ.

**'इ'कारान्तं नपुंसकलिङ्गं नाम वारि (वारि = व् + आ + र् + इ)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| वारि | वारिणी | वारीणि | **प्रथमा** |
| वारि | वारिणी | वारीणि | **द्वितीया** |
| वारिणा | वारिभ्याम् | वारिभि: | **तृतीया** |
| वारिणे | वारिभ्याम् | वारिभ्य: | **चतुर्थी** |
| वारिण: | वारिभ्याम् | वारिभ्य: | **पञ्चमी** |
| वारिण: | वारिणो: | वारीणाम् | **षष्ठी** |
| वारिणि | वारिणो: | वारिषु | **सप्तमी** |
| हे वारे, हे वारि | हे वारिणी | हे वारीणि | **सम्बोधनम्** |

वारिसदृशा: अन्ये शब्दा:- शुचि, सुरभि, भूरि इत्यादय: ।

**'ई'कारान्तं स्त्रीलिङ्गं नाम नदी (नदी = न् + अ + द् + ई)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| नदी | नद्यौ | नद्य: | **प्रथमा** |
| नदीम् | नद्यौ | नदी: | **द्वितीया** |
| नद्या | नदीभ्याम् | नदीभि: | **तृतीया** |
| नद्यै | नदीभ्याम् | नदीभ्य: | **चतुर्थी** |
| नद्या: | नदीभ्याम् | नदीभ्य: | **पञ्चमी** |
| नद्या: | नद्यो: | नदीनाम् | **षष्ठी** |
| नद्याम् | नद्यो: | नदीषु | **सप्तमी** |
| हे नदि | हे नद्यौ | हे नद्य: | **सम्बोधनम्** |

नदीसदृशा: अन्ये शब्दा:- जननी, कूपी, नारी, युवती, नगरी, मही, वापी, लेखनी, अङ्गनी, सम्मार्जनी, रुक्मिणी, घटी, नखकृन्तनी, सरस्वती, स्थाली, दासी इत्यादय: ।

## विशेषणम्



एष: बालक: । एतस्य नाम अजय: ।
अजय: उत्तम: बालक: ।
अजय: स्वस्थ: कार्यतत्पर: च बालक: ।

अत्र उत्तम:, चतुर:, स्वस्थ:, कार्यतत्पर: एते शब्दा: अजय: कीदृश: अस्ति इति कथयन्ति । अत: एते शब्दा: अजयस्य विशेषणानि ।

य: शब्द: नामपदस्य विषये अधिकं कथयति, तद् विशेषणम् । यस्य विषये ज्ञापनं भवति, स: विशेष्य: ।

| | | |
|---|---|---|
| नूतन: ग्रन्थ:। | नूतना कविता। | नूतनं काव्यम् । |
| कीदृश: ग्रन्थ:? | कीदृशी कविता? | कीदृशं काव्यम्? |
| नूतन: ग्रन्थ: । | नूतना कविता । | नूतनं काव्यम् । |

**अत्र विशेष्यस्य यद् लिङ्गम् अस्ति, तदेव विशेषणस्य लिङ्गं वर्तते ।**

| | |
|---|---|
| नूतनौ ग्रन्थौ । | नूतना: ग्रन्था: । |
| नूतने कविते । | नूतना: कविता: । |
| नूतने काव्ये । | नूतनानि काव्यानि । |

**अत्र विशेष्यस्य यद् वचनम् अस्ति, तदेव विशेषणस्य वचनं दृश्यते ।**

नूतनस्य ग्रन्थस्य । नूतनात् ग्रन्थात् । नूतनेषु ग्रन्थेषु ।
नूतनायां कवितायाम् । नूतनया कवितया । नूतनायै कवितायै ।
नूतनेन काव्येन । नूतनाभ्यां काव्याभ्याम् । नूतनयो: काव्ययो: ।

**एतेषु उदाहरणेषु विशेष्यस्य या विभक्ति:, सा एव विभक्ति: विशेषणस्य अपि वर्तते ।**


**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य । तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ।।**

### भाषाभ्यास:

अधोनिर्दिष्टानि विशेषण-विशेष्य-शब्दयुग्मानि चिनुत ।

| | | | |
|---|---|---|---|
| सुन्दरी | आचार्यौ | श्वेतौ | छात्रा: |
| सूत्रम् | आवश्यक: | कुसुमम् | माला |
| नेत्रे | पूज्यौ | कृतज्ञा: | आहार: |
| दीर्घम् | कृष्णे | कोमलम् | बकौ |

# १६. समानमस्तु भोजनम् । (चतुर्थः घटकः)



बालकृष्णः गोकुले गोपालनं करोति स्म । प्रतिदिनं सः वयस्यैः सह वनं गच्छति स्म । गोकुलस्थाः बालगोपालाः वासुदेवेन सह आसायं हिण्डन्ते स्म । मध्याह्ने ते सर्वे स्वगृहेभ्यः आनीतानि खाद्यवस्तूनि एकत्र उपविश्य खादन्ति स्म ।

एकस्मिन् दिने भोजनवेलायां सर्वे गोपाः कृष्णं परितः उपाविशन् । देवकीनन्दनः गोपबालान् अपृच्छत् । ''अद्य भोजनार्थं किम् आनीतम् ?'' इति । तदा प्रथमः अवदत्, ''मम समीपे दध्योदनं वर्तते ।'' अपरः अभाषत, ''मम समीपे पृथुकाः ।'' एवमेव सर्वे ''अपूपाः, लड्डुकाः, वटकाः, मोदकाः आनीताः'' इति अवदन्। तदा कृष्णः अवदत्, ''अयि मित्राणि, वयम् एतेषां खाद्यपदार्थानां मिश्रणं कुर्मः ।'' सर्वे गोपालाः आनन्देन कृष्णाय स्वं स्वं खाद्यम् अयच्छन् । कृष्णः स्वयमेव पदार्थानां मिश्रणम् अकरोत् । सर्वेभ्यः च तद् मिश्रणं पर्यवेषयत् । तद् अपूर्वं स्वादिष्टं मिश्रणं सर्वेभ्यः अतीव अरोचत । यतः तस्मिन् मिश्रणे न केवलं खाद्यपदार्थाः अपि तु स्नेहश्च मिश्रितः । तदा गोपनायकः बालकृष्णः अवदत्, ''इतःपरं वयं सर्वे सम्मिल्य एव भोजनं कुर्मः । अयि मित्राणि, अस्माकं मनांसि समानानि, विचाराः समानाः, भोजनमपि समानमस्तु।''

## भाषाभ्यासः

### १. एकवाक्येन उत्तरं लिखत ।

१. गोपबालाः भोजनाय किं किम् आनयन्?

२. कृष्णः किं किं समानमिति वदति?

३. कृष्णः खाद्यपदार्थे किं मिश्रयति?

४. पाठे प्रयुक्तानि कृष्णस्य नामानि लिखत ।

### २. प्रश्ननिर्माणं कुरुत ।

१. गोकुलस्थाः बालगोपालाः <u>वासुदेवेन</u> सह आसायं हिण्डन्ते स्म ।

२. बालकृष्णः गोकुले <u>गोपालनं</u> करोति स्म ।

३. **पृथक् कुरुत ।**

| नाम | सर्वनाम | विशेषणम् | क्रियापदम् |
|---|---|---|---|
| | | | |

(गोकुलस्था:, कृष्ण:, अकरोत्, किम्, मम, मोदका:, उपाविशन्, समाना:)

४. **समूहेतरपदं चिनुत ।**

१. बालकृष्ण:, देवकीनन्दन:, चन्द्रशेखर:, गोपनायक:

२. अवदत्, अभणत्, अगदत्, अकरोत्

५. **विरुद्धार्थशब्दान् मञ्जूषात: चिनुत ।**

१. मित्राणि × 	३. स्वादिष्ठम् ×

२. समीपे × 	४. समानानि ×

(रुचिहीनम्, विविधानि, अरय:, दूरे)

६. **लट्रूपाणि प्रयुज्य कथां पुन: वदत/लिखत ।**

७. **सहभोजनस्य स्वीयम् अनुभवं माध्यमभाषया लिखत ।**

८. **कृष्णस्य अन्यानि विविधानि नामानि अन्विष्यत लिखत च ।**

९. **युष्माकं प्रियभोजनपदार्थानां सूचिं संस्कृतभाषया कुरुत ।**

I8XCSF

**लट्लकारस्य पुरत: 'स्म' इति अव्ययस्य प्रयोगेन भूतकालिक: अर्थ: भवति ।**

**उदा. स: फलं खादति स्म = स: फलम् अखादत् ।**

**बालगोपाला: वासुदेवेन सह हिण्डन्ते स्म = बालगोपाला: वासुदेवेन सह अहिण्डन्त ।**

**गोपनायक: बालकृष्ण: वदति स्म = गोपनायक: बालकृष्ण: अवदत् ।**

### वदत संस्कृतम् ।

१. सुप्रभातम् ।
२. शुभरात्रि: ।
३. नमो नम: ।
४. धन्यवाद: ।
५. स्वागतम् ।
६. कृपया ।
७. अस्तु ।
८.शोभनम्/उत्तमम्।



### शुभाशया: ।

१. नववर्षस्य शुभाशया: ।
२. सफलतायै अभिनन्दनम्।
३. कार्यक्रम: सफल: भवतु।
४. शुभास्ते पन्थान: सन्तु।
५. परीक्षायै शुभाशया: ।
६. जीवेत् शरद: शतम् ।
७.दीपावली मङ्गलमातनोतु।
८. शुभं भवतु ।



# १७. सूक्तिसुधा ।

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा **विद्वान् सर्वत्र पूज्यते** ।।१।।

न भूतपूर्वं न कदापि वार्ता
हेम्नः कुरङ्गो न कदापि दृष्टः ।
तथापि तृष्णा रघुनन्दनस्य
**विनाशकाले विपरीतबुद्धिः** ।।२।।

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषो नास्ति **योजकस्तत्र दुर्लभः** ।।३।।

अतिदानात् बलिर्बद्धो ह्यतिमानात् सुयोधनः ।
विनष्टो रावणो लौल्यात् **अति सर्वत्र वर्जयेत्** ।।४।।

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी** ।।५।।

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं **वाग्भूषणं भूषणम्** ।।६।।

**कृतिः –** भारतसर्वकारस्य बोधवाक्यं '**सत्यमेव जयते**' इति । आयुर्विमा-महामण्डलस्य बोधवाक्यं '**योगक्षेमं वहाम्यहम्**' इति । इतोऽपि अन्येषां बोधचिह्नानां बोधवाक्यानां च सङ्ग्रहं कुरुत ।

मम शालायाः बोधवाक्यं --------------- ---- अस्ति ।

**श्लोक: – १**

१. एकवाक्येन उत्तरत ।

अ) राजा कुत्र पूज्यते ?

आ) क: सर्वत्र पूज्यते ?

२. चतुर्थं पदं लिखत ।

विद्वान् = विद्वत्वम् :: नृप: = ........।

३. समूहेतरपदं चिनुत ।

अ) भूप:, महीपाल:, पार्थिव:, पण्डित: ।

आ) प्राज्ञ:, विचक्षण:, चाणाक्ष:, क्षितिपति: ।

**श्लोक: – २**

१. एकवाक्येन उत्तरत ।

अ) कीदृश: कुरङ्ग: न कदापि दृष्ट: ?

आ) सुवर्णस्य कुरङ्गस्य तृष्णा कस्य जायते ?

२. मेलनं कुरुत ।

| | |
|---|---|
| कुरङ्ग: | प्रज्ञा |
| रघुनन्दन: | पिपासा |
| तृष्णा | मृग: |
| बुद्धि: | राम: |

**श्लोक: – ३**

१. एकवाक्येन उत्तरत ।

अ) कीदृशम् अक्षरं नास्ति ?

आ) कीदृशं मूलं नास्ति ?

इ) कीदृश: पुरुष: नास्ति ?

ई) क: दुर्लभ: ?

**श्लोक: – ४**

१. मेलनं कुरुत ।

| | |
|---|---|
| बलि: बद्ध: | अतिमानात् । |
| सुयोधन: बद्ध: | लौल्यात् । |
| रावण: विनष्ट: | अतिदानात् । |

२. एकवाक्येन उत्तरत ।

अ) बलि: कस्मात् बद्ध: ?

आ) सुयोधन: कस्मात् बद्ध: ?

इ) रावण: कस्मात् विनष्ट: ?

ई) किं सर्वत्र वर्जयेत् ?

**श्लोक: – ५**

१. रिक्तस्थानं पूरयत ।

| विशेषणम् | विशेष्यम् |
|---|---|
| ---- | लङ्का |
| गरीयसी | ---- , --- |

**श्लोक: – ६**

१. एकवाक्येन उत्तरत ।

अ) हारा: कीदृशा: ?

आ) मूर्धजा: कीदृशा: ?

इ) यथार्थं भूषणं किम् ?

ई) का पुरुषं समलङ्करोति ?

I978U3

२. समानार्थकशब्दान् मेलयत ।

| | |
|---|---|
| मूर्धजा: | प्रसूनम् |
| केयूरा: | अलंकार: |
| कुसुमम् | केशा: |
| वाणी | बाहुभूषणानि |
| भूषणम् | भाषा |



**हसत ! नन्दत !**

(मोहन: गले पदकद्वयं धरति)

मोना – मोहन, गले धृतं लघुपदकं किमर्थं लब्धं त्वया ?

मोहन: – गीतगायनार्थम् ।

मोना – अभिनन्दनम् । तर्हि बृहत्पदकं किमर्थं लब्धम् ?


मोहन: – गीतसमापनार्थम् । ☺☺

महिला – मीने, तव समीपे दश सेवफलानि सन्ति। तेषु पञ्च फलानि यदि तव सखी नेष्यति तर्हि किं भवेत् ?

मीना – युद्धम् । ☺☺

– चन्दमामा–मासिकात् ।

# १८. उपकारस्य स्मरणम् ।



**रामायणम् आदिकाव्यम् । रामायणस्य रचयिता वाल्मीकिः । श्रीरामस्य चरितम् अस्य ग्रन्थस्य विषयः । एषः प्रसङ्गः रामायणात् ।**

मारुतिः सीतायाः अन्वेषणार्थं लङ्कां प्रति उड्डयते । मार्गे महासागरः अस्ति । तस्य तले अवर्तत मैनाकः नाम पर्वतः । यदा मैनाकः गगने मारुतिं पश्यति तदा सः उद्गच्छति । समुद्रात् बहिः आयाति । मारुतिना क्रमणीयः मार्गः दीर्घः । मध्ये विश्रामार्थं स्थानमपि नास्ति इति मैनाकः जानाति । सः तस्य साहाय्यं कर्तुम् इच्छति । अतः मैनाकः मारुतिं प्रार्थयते, ''महाकपे! अलं परिश्रमेण, कृपया मम कूटे विश्रामं करोतु ।''

किमर्थं मैनाकः मारुतेः साहाय्यार्थम् उद्युक्तः? अपि सः मारुतेः आशीर्वचनम् इच्छति? न खलु । एतत् तु उपकारस्य स्मरणम् । मारुतेः तातः पवनदेवः मैनाकस्य साहाय्यम् अकरोत् पुरा । तदा सर्वे पर्वताः सपक्षाः । ते आकाशे स्वेच्छया विहरन्ति स्म, सहसा भूमौ निपतन्ति स्म । तेन त्रस्ताः ऋषयः इन्द्रम् उपागच्छन् । इन्द्रः पर्वतेभ्यः अकुप्यत् । सः वज्रेण पर्वतानां पक्षान् छेत्तुं प्रारभत । यदा इन्द्रः मैनाकं प्रति अगच्छत् तदैव पवनदेवः वेगेन तं समुद्रतलम् अनयत् । एवं पवनदेवः मैनाकं वज्रप्रहारात् अरक्षत् । मैनाकः पवनदेवस्य एतम् उपकारं स्मरति स्म । सः अचिन्तयत्, ''कृते च प्रतिकर्तव्यम् एष धर्मः सनातनः'' । अतः मैनाकः पवनपुत्रस्य मारुतेः साहाय्यम् अकरोत् । मैनाकस्य आतिथ्येन मारुतिः प्रीतः । तथापि विश्रामम् अकृत्वा सः कार्यसिद्ध्यर्थम् अग्रे सरति ।

## भाषाभ्यासः

१. एकवाक्येन उत्तरं लिखत ।

१) मारुतिः कस्याः अन्वेषणार्थं उड्डयते?
२) पर्वतस्य नाम किम्?
३) पुरा सर्वे पर्वताः कीदृशाः?
४) पर्वतैः के त्रस्ताः?
५) मैनाकं समुद्रतलं कः नयति?

२. प्रश्ननिर्माणं कुरुत ।

१) पवनदेवः मैनाकं वज्रप्रहारात् रक्षति ।
२) ऋषयः इन्द्रम् उपागच्छन् ।
३) इन्द्रः पर्वतेभ्यः अकुप्यत् ।
४) मैनाकः समुद्रात् बहिः आयाति ।

३. पृथक् कुरुत ।

| नाम | सर्वनाम | विशेषणम् | क्रियापदम् |
| --- | --- | --- | --- |
| | | | |

(मारुतिः, तम्, ऋषयः, दीर्घः, प्रीतः, चिन्तयति, उद्गच्छति, सः)

४. समूहेतरपदं चिनुत ।

१) मारुतिः, पवनपुत्रः, हनुमान्, पावकः ।

२) सुरपतिः, शक्रः, वज्रम्, इन्द्रः ।

३) मैनाकः, नगः, गिरिः, अचलः ।

I9G4VQ

५. विरुद्धार्थकशब्दान् लिखत ।

१) बहिः × २) उद्युक्तः × ३) स्मरणम् ×

६. पाठे 'मारुति' शब्दस्य स्थाने 'पवनसुत' अपि च 'पर्वत' इत्यस्य स्थाने 'अद्रि' इति शब्दं प्रयुज्य पाठं पुनर्लिखत ।

७. माध्यमभाषया लिखत ।

१. 'उपकारस्य स्मरणं' मैनाकेन कथं कृतम्?

२. मारुतेः उड्डाणकथां श्रुत्वा कस्य आधुनिककथापात्रस्य स्मरणं भवति?

३. रामायणे येषाम् उल्लेखः तेषाम् अन्य-पशु-पक्षिणां विषयम् अनुसृत्य सन्दर्भान् लिखत ।

४. यदि पर्वताः अधुना अपि पक्षयुक्ताः स्युः तर्हि किं भविष्यति?

## लेखनकौशलम् ।
## संवादलेखनम् ।



**उपकारस्य स्मरणम् इति गद्यपाठं मञ्जूषायाः आधारेण संवादरूपेण लिखत ।**

मैनाकः- कः एषः आकाशे उड्डयते ? एषः तु मारुतिः, पवनपुत्रः ।
नमः ते ________।

मारुतिः- नमः ________ ।

मैनाकः- अयं समुद्रमार्गः ________ । मार्गमध्ये ________ नास्ति ।
अतः क्षणं यावत् मम ________ विश्रामं करोतु ।

मारुतिः- आवयोः परिचयः अपि नास्ति । तथापि त्वं किमर्थं मम ________ करोषि?

मैनाकः- तव पिता ________ । तस्य उपकारस्मरणं करोमि । पुरा ________ सपक्षाः आसन् । ________ क्रोधेन पर्वतानां ________ छेत्तुम् आरभत । तदा ________ मम साहाय्यम् अकरोत् । त्वं तस्य ________ अतः अहं तव साहाय्यं कर्तुम् इच्छामि ।

मारुतिः- अस्तु । अहं प्रसन्नः । किन्तु स्थातुं न शक्नोमि । रामकार्यार्थम् अविलम्बं गच्छामि ।

**मञ्जूषा** - (पर्वताः, पवनपुत्राय, दीर्घः, मैनाकाय, कूटे, विश्रामस्थानम्, पवनदेवः, साहाय्यम्, इन्द्रः, सः, पक्षान्, पुत्रः)

# १९. राष्ट्रभक्तिः ।

अथ कोऽपि यात्रिकः प्रतिदिनं रेलयानेन यात्रां करोति स्म । एकदा तस्यैव पृष्ठतः दीर्घासने एका छात्रा उपाविशत् । अकस्मात् सा शालास्यूतम् उद्घाट्य सूचिं तथा सूत्रं स्व्यकरोत् । यात्रिकः कुतूहलेन तां पश्यति स्म। बालिका शालास्यूते किमर्थं सूचिसूत्रे आनयति? तथा च रेलयाने ताभ्यां किं प्रयोजनम्? इति यात्रिकः अचिन्तयत्। सा बालिका सूच्यां सूत्रं निवेश्य आसनस्य छिन्नं तल्पं यथापूर्वम् अकरोत् । यात्रिकः अपृच्छत्, ''अयि बालिके, त्वं किं करोषि?'' बालिका अवदत् '' एतद् रेलयानम् अस्माकं कृते अस्ति । एतत् राष्ट्रस्य सम्पत्तिः खलु। तस्य सुरक्षणम् अस्माकम् आद्यं कर्तव्यम् एव । अहं तदेव करोमि ।'' बालिकायाः एतद् उत्तरम् अतीव बोधप्रदम्। अनेन उत्तरेण भूरि प्रभावितः सः यात्रिकः विचारमग्नोऽभवत् ।

भोः बालकाः, वयमपि सर्वे राष्ट्रसम्पत्तेः सुरक्षणाय, राष्ट्ररक्षणाय संवर्धनाय च कटिबद्धाः भवामः । राष्ट्रधर्मम् आचरामः ।

## भाषाभ्यासः

१. एकवाक्येन उत्तरत ।

(१) यात्रिकः केन यात्रां करोति स्म? (२) छात्रा कुत्र उपाविशत्?

(३) बालिकायाः शालास्यूते किम् आसीत्? (४) वयं किम् आचरामः?

(५) बालिकायाः उत्तरं कीदृशम् अस्ति?

२. माध्यमभाषया उत्तरं लिखत ।

(१) का नाम राष्ट्रसम्पत्तिः ? (२) राष्ट्रसम्पत्तेः सुरक्षणाय यूयं किं कुरुथ ?

३. प्रश्ननिर्माणं कुरुत ।

(१) यात्रिकः कुतूहलेन बालिकां पश्यति स्म । (२) वाहनस्य सुरक्षणम् अस्माकम् आद्यं कर्तव्यम्।

४. गद्यांशतः समानार्थकशब्दान् लिखत ।

(अ) औत्सुक्यम्- (आ) धनम्- (इ) विद्यालयः- (ई) दोरकः-

५. गद्यांशतः विरुद्धार्थकशब्दान् लिखत ।

(अ) नयति ×.......... । (आ) उत्तिष्ठति ×.......... ।

६. कः कं वदति?

(१) ''अयि बालिके, त्वम् किं करोषि?''

७. मेलनं कुरुत । विशेषणानि- बोधप्रदम्, विचारमग्नः, छिन्नम्
विशेष्याणि- यात्रिकः, तल्पम्, उत्तरम्

८. कोष्टकं पूरयत ।

| नाम | सर्वनाम | लट्रूपाणि | लङ्रूपाणि |
|---|---|---|---|
| | | | |

(बालिकया, आचरामः, अहम्, पृच्छति, आसनस्य, एतद्, उत्तरेण, करोमि, अस्माकम्, यात्राम्, अभवत्, उपाविशत्, आनयति)

I9PZXD

## लेखनकौशलम् । चित्रवर्णनम् ।



पूर्वसिद्धता
- चित्रं पश्यत । सूक्ष्मम् अवलोकनं कुरुत ।
- एतत् कस्य चित्रम्?
- अत्र के पदार्थाः? कानि तेषां संस्कृतनामानि?
- अत्र काः क्रियाः?
- चित्रस्य किं वैशिष्ट्यम्?



- **शब्दमञ्जूषायाः आधारेण चित्रवर्णनं कुरुत ।**

एतद् निसर्गचित्रम् । आकाशे ________, ________ च सन्ति । ________ नृत्यति । ________ रटति । वृक्षस्य अधः ________ तिष्ठतः । जले ________, ________ च सन्ति ।

**मञ्जूषा** – (मयूरः, मीनाः, मेघाः, मण्डूकः, खगाः, कमलानि, बालकौ)

**कृतिः–** शिक्षकस्य साहाय्येन छात्राः वर्गकक्षा, रेलस्थानं, क्रीडाङ्गणम्, उद्यानम् एतेषां चित्राणां वर्णनं कुर्वन्ति ।

# भाषासूत्रम् – ४

## क्रियापदानि–३

## लङ्लकार: (प्रथमभूतकाल:)



| अद्य | ह्य: |
|---|---|
| गच्छति | अगच्छत् |
| खादति | अखादत् |
| वदति | अवदत् |

भूतकाल: पूर्वकाले घटितां क्रियां दर्शयति । संस्कृते भूतकालत्रयं वर्तते । लङ्, लिट् तथा लुङ् इति। अत्र वयं केवलं लङ् (प्रथमभूतकालं) पश्याम: । लङ् लकारे मूलधातो: पूर्वम् 'अ' इति आगम: भवति ।

क्रियापदसूत्रम् : ('अ'आगम: + मूलधातु: + गणविकरणम्) = धात्वङ्गम् + प्रत्यय:= क्रियापदम्
(आदेश:) (चिह्नम्)

| | | | | | |
|---|---|---|---|---|---|
| अ | + पठ् | + अ | = अपठ | + त् | = अपठत् |
| अ | + नृत् | + य | = अनृत्य | + त् | = अनृत्यत् |
| अ | + लिख् | + अ | = अलिख | + त् | = अलिखत् |
| अ | + पूज् | + अय | = अपूजय | + त् | = अपूजयत् |

### लङ्प्रत्यया:

| | प.प. प्रत्यया: | | | आ. प. प्रत्यया: | | |
|---|---|---|---|---|---|---|
| | ए.व. | द्विव. | ब.व. | ए.व. | द्विव. | ब.व. |
| प्र.पु. | त् | ताम् | अन् | त | इताम् | अन्त |
| म. पु. | : | तम् | त | था: | इथाम् | ध्वम् |
| उ.पु. | अम् | व | म | इ | वहि | महि |

### लङ्रूपाणि

**पठ् १ प.प.**

| | ए. व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अपठत् | अपठताम् | अपठन् |
| म.पु. | अपठ: | अपठतम् | अपठत |
| उ.पु. | अपठम् | अपठाव | अपठाम |

**भाष् १ आ. प.**

| | ए. व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अभाषत | अभाषेताम् | अभाषन्त |
| म.पु. | अभाषथा: | अभाषेथाम् | अभाषध्वम् |
| उ.पु. | अभाषे | अभाषावहि | अभाषामहि |

**नृत् ४ प. प.**

| | ए. व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अनृत्यत् | अनृत्यताम् | अनृत्यन् |
| म.पु. | अनृत्य: | अनृत्यतम् | अनृत्यत |
| उ.पु. | अनृत्यम् | अनृत्याव | अनृत्याम |

**युध् ४ आ. प.**

| | ए. व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अयुध्यत | अयुध्येताम् | अयुध्यन्त |
| म.पु. | अयुध्यथा: | अयुध्येथाम् | अयुध्यध्वम् |
| उ.पु. | अयुध्ये | अयुध्यावहि | अयुध्यामहि |

लिख् ६ प.प.

| | ए. व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अलिखत् | अलिखताम् | अलिखन् |
| म.पु. | अलिखः | अलिखतम् | अलिखत |
| उ.पु. | अलिखम् | अलिखाव | अलिखाम |

दिश् ६ आ. प.

| | ए. व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अदिशत | अदिशेताम् | अदिशन्त |
| म.पु. | अदिशथाः | अदिशेथाम् | अदिशध्वम् |
| उ.पु. | अदिशे | अदिशावहि | अदिशामहि |

पूज् १० प. प.

| | ए. व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अपूजयत् | अपूजयताम् | अपूजयन् |
| म.पु. | अपूजयः | अपूजयतम् | अपूजयत |
| उ.पु. | अपूजयम् | अपूजयाव | अपूजयाम |

पूज् १० आ. प.

| | ए. व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अपूजयत | अपूजयेताम् | अपूजयन्त |
| म.पु. | अपूजयथाः | अपूजयेथाम् | अपूजयध्वम् |
| उ.पु. | अपूजये | अपूजयावहि | अपूजयामहि |

**पञ्चदशवाक्यानि (प.प./आ.प.)**

१. सः बालकः अगच्छत्/अभाषत ।

१. सा बालिका अगच्छत्/अभाषत ।

१. तद् अपत्यम् अगच्छत्/अभाषत ।

२. तौ बालकौ अगच्छताम्/अभाषेताम् ।

२. ते बालिके अगच्छताम्/अभाषेताम् ।

२. ते अपत्ये अगच्छताम्/अभाषेताम् ।

३. ते बालकाः अगच्छन्/अभाषन्त ।

३. ताः बालिकाः अगच्छन्/अभाषन्त ।

३. तानि अपत्यानि अगच्छन्/अभाषन्त ।

४. त्वम् अगच्छः/अभाषथाः ।

५. युवाम् अगच्छतम्/अभाषेथाम् ।

६. यूयम् अगच्छत/अभाषध्वम् ।

७. अहम् अगच्छम्/अभाषे ।

८. आवाम् अगच्छाव/अभाषावहि ।

९. वयम् अगच्छाम/अभाषामहि ।

**क्रियापदकोशात् प.प./आ.प. धातून् दृष्ट्वा १५ वाक्यानि वदत ।**

अस् प.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | आसीत् | आस्ताम् | आसन् |
| म.पु. | आसीः | आस्तम् | आस्त |
| उ.पु. | आसम् | आस्व | आस्म |

कृ प.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अकरोत् | अकुरुताम् | अकुर्वन् |
| म.पु. | अकरोः | अकुरुतम् | अकुरुत |
| उ.पु. | अकरवम् | अकुर्व | अकुर्म |

कृ आ.प.

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.पु. | अकुरुत | अकुर्वाताम् | अकुर्वत |
| म.पु. | अकुरुथाः | अकुर्वाथाम् | अकुरुध्वम् |
| उ.पु. | अकुर्वि | अकुर्वहि | अकुर्महि |

## क्रियापदानि–४

### उपसर्गसहितानि लङ्रूपाणि ।

१. कन्या जनकम् अन्वगच्छत् ।
२. छात्रः शिक्षकम् प्रत्यवदत् ।
३. अर्जुनः रथे उपाविशत् ।
४. बालः जननीं दृष्ट्वा व्यहसत् ।

अधोरेखितानि लङ्क्रियापदानि । किन्तु अत्र 'अ' इति आगमः स्पष्टतया न दृश्यते ।

अन्वगच्छत् = अनु+ अगच्छत्

प्रत्यवदत् = प्रति+ अवदत्

उपाविशत् = उप+ अविशत्

व्यहसत् = वि+ अहसत्

अत्र अनु, प्रति, उप, वि एते उपसर्गाः । उपसर्गाः धातोः पूर्वं भवन्ति ।

लङ्रूपनिर्माणसमये प्रथमं 'अ' इति आगमसहितरूपं भवति । अनन्तरं उपसर्गसंयोजनं भवति ।

प्र + गम् - लङ्लकारः

१. प्र + अगच्छत् = प्रागच्छत्

सम् + भाष् - लङ्लकारः

२. सम् + अभाषत = समभाषत

**प्रति + गम् –गच्छ् (१ प.प.)**

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र. पु. | प्रत्यगच्छत् | प्रत्यगच्छताम् | प्रत्यगच्छन् |
| म.पु. | प्रत्यगच्छः | प्रत्यगच्छतम् | प्रत्यगच्छत |
| उ.पु. | प्रत्यगच्छम् | प्रत्यगच्छाव | प्रत्यगच्छाम |

**सम् + भाष् (१ आ.प.)**

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र. पु. | समभाषत | समभाषेताम् | समभाषन्त |
| म.पु. | समभाषथाः | समभाषेथाम् | समभाषध्वम् |
| उ.पु. | समभाषे | समभाषावहि | समभाषामहि |



### पठत–बोधत–रिक्तस्थाने लिखत ।

| उपसर्गः + धातुः | लट्रूपम् | उपसर्ग + मूलधातोः लङ्रूपम् | लङ्रूपम् |
|---|---|---|---|
| उप + गम् | उपगच्छति | उप + अगच्छत् (अ + अ = आ) = | उपागच्छत् |
| अव + गम् | अवगच्छति | अव + अगच्छत् (अ + अ = आ) = | ______ |
| प्र + गम् | प्रगच्छति | प्र + अगच्छत् (अ + अ = आ) = | ______ |
| आ + गम् | आगच्छति | ______________________ | आगच्छत् |
| निर् + गम् | ______ | निर् + अगच्छत् (र् + अ = र) = | निरगच्छत् |
| उद् + गम् | उद्गच्छति | उद् + अगच्छत् (द् + अ = द) = | ______ |
| प्रति + गम् | प्रतिगच्छति | प्रति + अगच्छत् (इ + अ = य) = | प्रत्यगच्छत् |
| अधि + गम् | अधिगच्छति | अधि + अगच्छत् (इ + अ = य) = | ______ |
| अनु + गम् | ______ | अनु + अगच्छत् (उ + अ = व) = | अन्वगच्छत् |
| सम् + गम् | सङ्गच्छते | सम् + अगच्छत (म् + अ = म) = | समगच्छत |
| वि + रम् | ______ | वि+ अरमत् (इ + अ = य) = | ______ |

## १. उचितं लङ्रूपं लिखत ।

| धातुः | गणः पदं च | पुरुषः वचनं च | रूपम् |
|---|---|---|---|
| १. लिख् | ६ प. प. | प्रथमपुरुषः ब. व. | |
| २. तुष् | ४ प. प. | उत्तमपुरुषः ए. व. | |
| ३. शुभ् (शोभ्) | १ आ. प. | मध्यमपुरुषः ब. व. | |
| ४. सेव् | १ आ. प. | उत्तमपुरुषः द्विव. | |
| ५. उत् +पत् | १ प. प. | प्रथमपुरुषः ब. व. | |
| ६. युध् | ४ आ. प. | उत्तमपुरुषः ब. व. | |
| ७. भक्ष् | १० आ. प. | प्रथमपुरुषः द्विव. | |
| ८. आ+कर्ण् | १० आ. प. | मध्यमपुरुषः ए. व. | |
| ९. जन् (जा) | ४ आ. प. | उत्तमपुरुषः ब. व. | |
| १०. कम्प् | १ प. प. | मध्यमपुरुषः द्विव. | |

## २. रूपपरिचयं लिखत ।

| रूपम् | धातुः | गणः पदं च | कालः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| १. अखादम् | | | | | |
| २. अम्रियत | | | | | |
| ३. उपाविशम् | | | | | |
| ४. समभाषन्त | | | | | |
| ५. अलभध्वम् | | | | | |
| ६. अतिष्ठः | | | | | |
| ७. पर्यत्यजत् | | | | | |
| ८. अनयत् | | | | | |
| ९. अरमध्वम् | | | | | |
| १०. अपश्यत | | | | | |

यदा धातोः प्रथमाक्षरं स्वरः भवति तदा विशेषतया अवधानम् आवश्यकम् ।
'अ' आगमः + धातु-आदेशः + गणविकरणम् = धात्वङ्गं + प्रत्ययः = क्रियापदरूपम्
१. अ + अट् + अ = आट + त् = आटत् (अत्र 'अ' स्थाने 'आ' भवति ।)
२. अ + ईक्ष् + अ = ऐक्ष + त = ऐक्षत (अत्र 'ई' स्थाने 'ऐ' भवति ।)
३. अ + इष्(इच्छ्) + अ = ऐच्छ + त = ऐच्छत् (अत्र 'इ' स्थाने 'ऐ' भवति ।)

## अव्ययानि-विशिष्टविभक्तयश्च ।

**कृषीवलः ।**

यदा कृषीवलः क्षेत्रे बीजानि वपति तदा धान्यं विन्दते । कृषीवलः आदिनम् अतीव कष्टं करोति, तथापि न श्रान्तः भवति । बलीवर्दानां साहाय्येन भूमिं कृषति । क्षेत्रे एव दिनं यापयति । यदि जलं न वर्षति तर्हि तस्य जीवनम् अस्थिरं भवति । भूमिपुत्राय नमः ।

अत्र अधोरेखितान् शब्दान् पश्यत । एतेषु शब्देषु लिङ्ग-विभक्ति-पुरुष-वचनानुसारं कदापि व्ययः (परिवर्तनं) न भवति । अतः एतानि अव्ययानि इति उच्यन्ते । अतः, यतः, यथा, तथा, यदि, तर्हि, यद्यपि, तथापि, अत्र, तत्र, कुत्र, कदा, कति, पुरतः, पृष्ठतः, पुनः, न, अनन्तरम्, ननु, खलु, अयि, आम्, इति, इव, एव, एवम्, किल, ततः, च, उच्चैः, नीचैः, हि, वै, तु, अपि इत्यादीनि अव्ययानि ।

कानिचन अव्ययानि विशिष्ट-विभक्तिरूपम् अपेक्षन्ते । तानि अधः निर्दिष्टानि ।

१. अभितः = (द्वितीया) **सूर्यम्** अभितः ग्रहाः भ्रमन्ति ।
२. परितः = (द्वितीया) **देवालयं** परितः भक्ताः सन्ति ।
३. उभयतः = (द्वितीया) **मार्गम्** उभयतः वृक्षाः वर्तन्ते ।
४. प्रति = (द्वितीया) बालकः **जननीं** प्रति धावति ।
५. विना = (द्वितीया/तृतीया/पञ्चमी) **जलं**/**जलेन**/**जलात्** विना जीवनम् अशक्यम् ।
६. सह = (तृतीया) **रामेण** सह सीता वनं गच्छति ।
७. अलम् = (तृतीया) अलं **खादनेन** । अलं **परिश्रमेण** ।
८. नमः = (चतुर्थी) **श्रीगणेशाय** नमः । **शारदायै** नमः ।
९. बहिः = (पञ्चमी) जम्बूकः **कूपात्** बहिः आगच्छत् ।
१०. कृते = (षष्ठी) **देशस्य** कृते सैनिकाः स्वप्राणान् त्यजन्ति ।
११. समीपे = (षष्ठी) **शालायाः** समीपे क्रीडाङ्गणं वर्तते ।

केचन धातवः अपि विशिष्टां विभक्तिम् अपेक्षन्ते । तेषु विशेषतया अवधानं दातव्यम् । ते धातवः अधः निर्दिष्टाः ।

१. गम् = (द्वितीया) अहं **शालां** गच्छामि ।
२. रुच् = (चतुर्थी) क्रीडनकं **मह्यं** रोचते ।
३. कुप् = (चतुर्थी) जनकः **मह्यं** कदापि न कुप्यति ।
४. क्रुध् = (चतुर्थी) अहं **मित्रेभ्यः** नैव क्रुध्यामि ।
५. दा-यच्छ् = (चतुर्थी) आदित्यः **अनिकेताय** लेखनीं यच्छति ।
६. कथ् = (चतुर्थी) छात्रः **शिक्षकाय** वृत्तान्तं कथयति ।
७. रक्ष् = (पञ्चमी) रामः **असुरात्** रक्षति ।
८. वि+रम् = (पञ्चमी) उद्योगी मनुष्यः **स्वकार्यात्** न विरमति ।
९. स्निह् = (सप्तमी) अम्बा **मयि** नितरां स्निह्यति ।

## प्रश्नार्थकाः ।

प्रश्ननिर्माणार्थं 'किम्' सर्वनाम उपयुज्यते । तथा 'क'-अक्षरेण अन्ये प्रश्नार्थकशब्दाः आरभन्ते । ते ककाराः।

यथा- किम्, कुत्र, कति, कदा, कुतः, कथम्, किमर्थम् ।

- प्रश्ननिर्माणं कथम्?

१. शिक्षिका सुधाखण्डेन लिखति ।
शिक्षिका केन लिखति?

२. रामः सीतायै फलानि यच्छति ।
रामः कस्यै फलानि यच्छति?

३. चटका निवासाय नीडं रचयति ।
चटका किमर्थं नीडं रचयति?

४. सा सुस्वरं गायति ।
सा कथं गायति?

- प्रतिपदं ककारः कथं युज्यते?

अमेयः गृहे सायङ्काले पञ्चकाव्यानि ज्ञानार्थम् उच्चैः पठति ।

१. **कः** गृहे सायङ्काले पञ्चकाव्यानि ज्ञानार्थम् उच्चैः पठति ?

२. अमेयः **कुत्र** सायङ्काले पञ्चकाव्यानि ज्ञानार्थम् उच्चैः पठति ?

३. अमेयः गृहे **कदा** पञ्चकाव्यानि ज्ञानार्थम् उच्चैः पठति ?

४. अमेयः गृहे सायङ्काले **किं** ज्ञानार्थम् उच्चैः पठति ?

५. अमेयः गृहे सायङ्काले पञ्चकाव्यानि **किमर्थम्** उच्चैः पठति ?

६. अमेयः गृहे सायङ्काले पञ्चकाव्यानि ज्ञानार्थं **कथं** पठति ?

१. प्रश्ननिर्माणार्थम् उचितं पर्यायं चिनुत ।

१. आकाशे मेघाः गर्जन्ति । (कः/के)

२. छात्रैः शाला शोभते । (कस्मै/कैः)

३. खगानां समूहः गगने वर्तते । (केषां/कासाम्)

४. शिक्षकान् प्रति आदरः आवश्यकः ।(केषाम्/कान्)

५. अहम् अनन्तरं भोजनं करोमि । (कदा/कुत्र)

६. ते पठनाय विद्यालयं गच्छन्ति । (कदा/किमर्थम्)

## पठत-बोधत ।



आचार्यः = अयि छात्राः, अद्य वयं प्रश्नोत्तरी-माध्यमेन क्रीडामः ।

रेणुका = यः उत्तरति सः खलु ज्ञानपतिः । पश्यामः, कः भवति ज्ञानपतिः ?

आचार्यः = वदत, ' ऋषे रचय रामायणम्।' इति ब्रह्मदेवः कम् आदिशत्?

श्वेता = आचार्य, अहं वदामि । 'ऋषे, रचय रामायणम्' इति ब्रह्मदेवः महर्षिवाल्मीकिम् आदिशत् ।

आचार्यः = शोभनं श्वेते । अधुना द्वितीयः प्रश्नः । महाभारतं केन लिखितम् ?

महेशः = आचार्य, महाभारतं गणेशेन लिखितम् ।

आचार्यः = बहु सम्यक् । महर्षिव्यासेन महाभारतं रचितम् । गणेशेन तत् लिखितम् । महेश, साधु साधु । त्वमपि ज्ञानपतिः । अधुना तृतीयः प्रश्नः । भगवान् सूर्यः कस्मै कवचकुण्डलानि दत्तवान्?

प्रतीक्षा = आचार्य, अहं वदामि । भगवान् सूर्यः कर्णाय कवचकुण्डलानि दत्तवान् ।

आचार्यः = उत्तमम् । अर्जुनः पाशुपतास्त्रं कस्मात् प्राप्तवान्?

विशालः = आचार्य, अर्जुनः पाशुपतास्त्रं शङ्करात् प्राप्तवान् ।

आचार्यः = शोभनं शोभनम् । युष्माकं सामान्यज्ञानम् उत्तमम् अस्ति । भवन्तः सर्वेऽपि ज्ञानवन्तः भवन्तु।

छात्राः = धन्यवादाः आचार्य ।

एतेन प्रकारेण कक्षायां व्यक्तिशः / गणशः प्रश्नोत्तरीमाध्यमेन क्रीडत ।

# वर्णमाला ।

**स्वराः (१३)**

१) ह्रस्व-स्वराः- अ इ उ ऋ लृ

२) दीर्घ-स्वराः- आ ई ऊ ॠ

३) संयुक्त -दीर्घस्वराः- ए (अ/आ + इ/ई)

ऐ (अ/आ + ए)

ओ (अ/आ + उ/ऊ)

औ (अ/आ + ओ/अ)

**व्यञ्जनानि (३३)**

**१) वर्गीयव्यञ्जनानि**

| | | | | | |
|---|---|---|---|---|---|
| कु (क वर्गः) | क् | ख् | ग् | घ् | ङ् |
| चु (च वर्गः) | च् | छ् | ज् | झ् | ञ् |
| टु (ट वर्गः) | ट् | ठ् | ड् | ढ् | ण् |
| तु (त वर्गः) | त् | थ् | द् | ध | न् |
| पु (प वर्गः) | प् | फ् | ब् | भ् | म् |

**२) अवर्गीयव्यञ्जनानि**

(१) अन्तःस्थव्यञ्जनानि य् र् ल् व्

(२) उष्मव्यञ्जनानि श् ष् स् ह्

अभिजातसंस्कृते 'ळ्' नास्ति, केवलं वैदिकसूक्तेषु।

**स्वराश्रितौ (२)**- अनुस्वारः ( ं )

विसर्गः (:) च ।

**संयुक्त-व्यञ्जनानि ।**

श्र = श् + र् + अ ।

ग्र = ग् + र् + अ ।

त्र = त् + र् + अ ।

ज्ञ = ज् + ञ् + अ ।

क्ष = क् + ष् + अ ।

**संयुक्त-व्यञ्जन-लेखनम् ।**

पद्मम् = पद्मम्　　चिह्नम् = चिह्नम्

ब्रह्मा= ब्रह्मा　　द्वितीया = द्वितीया

उद्भवः = उद्भवः　　गङ्गा = गङ्गा

विद्या = विद्या　　नाट्यम् = नाट्यम्

कश्चित्= कश्चित्　　बुद्धिः = बुद्धिः

विद्वत्ता = विद्वत्ता

**शब्दविग्रहः । (उदाहरणानुसारं शब्दविग्रहं कुरुत ।)**

माला- म् + आ + ल् + आ ।

प्रज्ञा- प् + र् + अ + ज् + ञ् + आ ।

चक्षुः - च् + अ + ञ् + च् + उः ।

संस्कृतम्- स् + अं + स् + क् + ऋ + त् + अ + म् ।

चिह्नम् - च् + इ + ह् + न् + अ + म् ।

जाह्नवी - ज् + आ + ह् + न् + अ + व् + ई ।

अश्वः - अ + श् + व् + अः ।

कृष्णः- क् + ऋ + ष् + ण् + अः ।

ब्रह्म- ब् + र् + अ + ह् + म् + अ ।

दत्तम् - द् + अ + त् + त् + अ + म् ।

श्रीपादः - श् + र् + ई + प् + आ + द् + अः ।

भुजङ्गः - भ् + उ + ज् + ङ् + ग् + अः ।

हस्तः - ह् + अ + स् + त् + अः ।

देवः - द् + ए + व् + अः ।

## अनुस्वारस्य उच्चारणं लेखनं च ।

गंगा, रोमांच:, घंटा, दंत:, जंबूक:- इति शब्देषु अनुस्वार: समान:, परन्तु अनुस्वारस्य उच्चारणं न समानम्। तत्र किं कारणम्? अनुस्वारस्य परे य: वर्ण: तदनुसारम् उच्चारणं भवति ।

यथा- गंगा

- अनुस्वारस्य परे 'ग'कार: । गकार: क वर्गे अस्ति । (क्, ख्, ग्, घ्, **ङ्**)
- क वर्गस्य अनुनासिकम् ङ् इति ।
- अत: गंगा इति शब्दे अनुस्वारस्थाने वर्गीयस्य अनुनासिकस्य उच्चारणं भवति ।

गंगा = ग**ङ्**गा(गङ्गा)।

| | | | | | |
|---|---|---|---|---|---|
| तथैव– | रोमांच:- | च्, छ्, ज्, झ्, **ञ्** | = | रोमा**ञ्**च: | (रोमाञ्च:) |
| | घंटा – | ट्, ठ्, ड्, ढ्, **ण्** | = | घ**ण्**टा | (घण्टा) |
| | दंत: – | त्, थ्, द्, ध्, **न्** | = | द**न्**त: | (दन्त:) |
| | जंबूक: – | प्, फ्, ब्, भ्, **म्** | = | ज**म्**बूक: | (जम्बूक:) |

- अनुस्वारस्य परे अवर्गीय-वर्ण: भवति तदा अनुस्वार: एव लेखितव्य: । यथा हंस:, संवाद:

**योग्यम् अनुनासिकं योजयित्वा शब्दं पुन: लिखत ।** उदा. – अंजलि:- अञ्जलि:

मंदाकिनी, नागेंद्र:, शंका, पंच, कंपनम्, लंबितम्, भुजंग:, तांडवम्, संभ्रम:, चंद्र:, संख्या, नंदिनी, संतति:, अंबुजम्, मंडूक:, सिंचनम्, निंब:, कुंचिका, कंटक:

## अनुस्वारस्य/मकारस्य लेखनम् ।

१. केवलं शब्दलेखनसमये शब्दान्त-अनुस्वारस्य स्थाने 'म्' इति एव अनुनासिकं लेखनीयम् ।
यथा – सौजन्यम्।

२. अनुस्वारस्य पुरत: व्यञ्जनान्तशब्द: भवेत् तदा अनुस्वार: (ं) लेखनीय: ।
यथा–वाक्यं रसात्मकं काव्यम्।

३. अनुस्वारस्य पुरत: स्वर: भवेत् तदा 'म्' इति लेखनीयम् । यथा–वाक्यम् अतीव रसपूर्णम्।

४. वाक्यान्ते अनुस्वार: भवेत् तदा 'म्' इति एव लेखनीयम् । यथा–हस्तस्य भूषणं दानम् ।

**संस्कृतलेखननियमानुसारं पुन: लिखत ।**

उदा. **सत्यम् कंठस्य भूषणं (अयोग्यम्)।** **सत्यं कण्ठस्य भूषणम् (योग्यम्)।**

१. परोपकारार्थं इदम् शरीरम् ।
२. पिंडे पिंडे मति: भिन्ना ।
३. सताम् तु संग: सकलम् प्रसूते।
४. सत्संगति: कथय किम् न करोति पुंसां ।
५. नभोऽन्तरिक्षम् गगनम् अनंतम् सुरवर्त्म खं ।

## अकारादिक्रमेण धातुकोषः ।

### १. प.प.

| | |
|---|---|
| अट्–अटति | |
| अर्ह्–अर्हति | |
| कूज्–कूजति | |
| कृष्–कर्ष्–कर्षति | |
| क्रीड्–क्रीडति | |
| क्षि–क्षय्–क्षयति | |
| चर्–चरति | |
| जप्–जपति | |
| जल्प्–जल्पति | |
| जि–जय्–जयति | |
| जीव्–जीवति | |
| तॄ–तर्–तरति | |
| त्यज्–त्यजति | |
| दा–यच्छ्–यच्छति | |
| दृश्–पश्य्–पश्यति | |
| दंश्–दश्–दशति | |
| धाव्–धावति | |
| ध्यै–ध्याय्–ध्यायति | |
| नम्–नमति | |
| पत्–पतति | |
| पा–पिब्–पिबति | |
| भू–भव्– भवति | |
| भ्रम्–भ्रमति | |
| यज्–यजति | |
| रट्–रटति | |
| रक्ष्–रक्षति | |
| रुह्–रोह्–रोहति | |
| लप्–लपति | |
| लस्–लसति | |
| वद्–वदति | |
| वृष्–वर्षति | |
| वस्–वसति | |
| व्रज्–व्रजति | |
| सृ–सर्–सरति | |
| स्था–तिष्ठ्– तिष्ठति | |
| स्मृ–स्मरति | |
| स्रु–स्रव्–स्रवति | |
| हस्–हसति | |

### १ आ.प.

| | |
|---|---|
| ईक्ष्–ईक्षते | |
| कम्–कामय्–कामयते | |
| कम्प्–कम्पते | |
| धृ–धर्–धरते | |
| बाध्–बाधते | |
| भज्–भजते | |
| भाष्–भाषते | |
| यत्–यतते | |
| रभ्–रभते | |
| रम्–रमते | |
| राज्–राजते | |
| रुच्–रोच्–रोचते | |
| लभ्–लभते | |
| लम्ब्–लम्बते | |
| वन्द्–वन्दते | |
| वृत्–वर्त्–वर्तते | |
| वृध्–वर्ध्–वर्धते | |
| शुभ्–शोभ्–शोभते | |
| सह्–सहते | |
| सेव्–सेवते | |
| स्तम्भ्–स्तम्भते | |

### १ उ.प.

| | |
|---|---|
| कूर्द्–कूर्दति/ते | |
| नी–नय्–नयति/ते | |
| बुध्–बोध्–बोधति/ते | |
| श्रि–श्रय्–श्रयति/ते | |
| हृ–हर्–हरति/ते | |

२. प.प.

| | |
|---|---|
| अस् - अस्ति | |

४ प. प.

| | |
|---|---|
| अस्-अस्यति | |
| इष्-इष्यति | |
| क्रुध्-कुध्यति | |
| तुष्-तुष्यति | |
| नश्-नश्यति | |
| नृत्-नृत्यति | |
| पुष्-पुष्यति | |
| भ्रम्-भ्राम्यति | |
| श्रम्-श्राम्यति | |
| सिध्-सिध्यति | |
| स्निह्-स्निह्यति | |

४. आ.प.

| | |
|---|---|
| क्लिश्-क्लिश्यते | |
| पद्-पद्यते | |
| मन्-मन्यते | |
| युज्-युज्यते | |
| युध्-युध्यते | |
| विद्-विद्यते | |

६. प.प.

| | |
|---|---|
| इष्-इच्छ्-इच्छति | |
| कृष्-कृषति | |
| प्रच्छ्-पृच्छ्-पृच्छति | |
| मस्ज्-मज्ज्-मज्जति | |
| लिख्-लिखति | |
| लुठ्-लुठति | |
| विश्-विशति | |
| सृज्-सृजति | |
| स्पृश्-स्पृशति | |
| स्फुर्-स्फुरति | |

६. आ.प.

| | |
|---|---|
| दृ-द्रियते | |
| मृ-म्रियते | |
| लस्ज्-लज्ज्-लज्जते | |

६. उ.प.

| | |
|---|---|
| क्षिप्-क्षिपति/ते | |
| दिश्-दिशति/ते | |
| मुच्-मुञ्च्-मुञ्चति/ते | |
| मिल्-मिलति/ते | |
| विद्-विन्द्-विन्दति/ते | |
| सिच्-सिञ्च्-सिञ्चति/ते | |

८. उ.प.

| | |
|---|---|
| कृ - करोति/कुरुते | |

१०. उ.प.


| | |
|---|---|
| कथ्-कथयति/ते | |
| क्षल्-क्षाल्-क्षालयति/ते | |
| चिन्त्-चिन्तयति/ते | |
| धृ-धार्-धारयति/ते | |
| पीड्-पीडयति/ते | |
| पूज्-पूजयति/ते | |
| पूर्-पूरयति/ते | |
| भक्ष्-भक्षयति/ते | |
| भूष्-भूषयति/ते | |
| रच्-रचयति/ते | |
| लोक्-लोकयति/ते | |
| वर्ण्-वर्णयति/ते | |
| वृज्-वर्ज्-वर्जयति/ते | |
| सूच्- सूचयति/ते | |
| स्पृह्-स्पृहयति/ते | |

१० आ.प.

| | |
|---|---|
| अर्थ्-अर्थयते | |
| मन्त्र्-मन्त्रयते | |
| मृग्-मृगयते | |

**छात्रैः धात्वर्थाः शिक्षकस्य / धातुकोषस्य साहाय्येन लेखनीयाः ।**

## अकारादिक्रमेण शब्दकोषः ।



**छात्रैः शब्दार्थाः शिक्षकस्य / शब्दकोषस्य साहाय्येन लेखनीयाः ।**

अग्रजः (पुं.) =
अनुजः (पुं.) =
अनृतम् (नपुं) =
अन्वेषणम् (नपुं.) =
अभिहता (विशे.) =
आन्तर्जालम् (नपुं.) =
आपणः (पुं.) =
आपणिकः (पुं.) =
आभरणम् (नपुं.) =
आसन्दः (पुं.) =
आसायम् (अव्यय) =
आहत्य (अव्यय) =
उद्वाहिनी (स्त्री.) =
उपनेत्रम् (नपुं.) =
कर्कटिका (स्त्री.) =
कर्कटी (स्त्री.) =
कर्गजः (पुं.) =
काष्ठिकः (पुं.) =
कुञ्चिका (स्त्री.) =
कुठारः (पुं.) =
कूटम् (न.) =
कूपी (स्त्री.) =
केयूरः (पुं.) =
गरीयस् (विशे.) =
गलन्तिका (स्त्री) =
गृहपतिः (पुं.) =
घृष्टः (विशे.) =
चषकः (पुं.) =
छिन्नम् (विशे.) =
जलप्रपातः (पुं.) =
दन्तकूर्चः (पुं.) =
दोला (स्त्री.) =
धूनयते (धातुरूप) =
निर्वाता (विशे.) =
निशाचरचमूः (स्त्री.) =
पक्ववटः (पुं.) =
पर्पटः (पुं.) =
परितः (अव्यय) =
पादोन (अव्यय) =
पानकम् (नपुं.) =
पायसम् (नपुं.) =
प्रकोष्ठः (पुं.) =
प्रजापतिः (पुं.) =
प्रतिकर्तव्यम् (विशे.) =
प्रसरः (पुं.) =
प्रातराशः (पुं.) =
प्रीतः (विशे.) =
भल्लूकः (पुं.) =
मनोजवः (पुं.) =
मरीचिका (स्त्री.) =
मशकः (पुं.) =
मसी (स्त्री.) =
मार्जनी (स्त्री.) =
मृण्मयी (स्त्री.) =
मृण्मयम् (नपुं.) =
यष्टिका (स्त्री.) =
यानम् (नपुं.) =
युतकम् (नपुं.) =
लगुडः (पुं.) =
लघुभारा (विशे.) =
लौल्यम् (नपुं.) =
वमति (धातुरूप) =
वयस्यः (पुं.) =
वातात्मजः (पुं.) =
वार्यते (धातुरूप) =
विकीर्णम् (विशे.) =
वित्तकोषः (पुं.) =
वेल्लनी (स्त्री.) =
वोढुम् (अव्यय) =
व्ययः (पुं.) =
व्यसनम् (नपुं.) =
शाटिका (स्त्री.) =
शालास्यूतः (पुं.) =
शिथिलबन्धनम् (नपुं.) =
शीतपेटिका (स्त्री.) =
शुनकः (पुं.) =
सुप्तः (विशे.) =
सूचिः (स्त्री.) =
सूत्रम् (नपुं.) =
स्यूतः (पुं.) =
स्वर्णमयी (स्त्री.) =
हेमन् (नपुं.) =

## ।। अमरकोषः ।।

| कण्ठस्थीकरणार्थम् । | विग्रहः । |
|---|---|
| **गणेशः**–विनायको विघ्नराजद्वैमातुरगणाधिपाः । | विनायकः, विघ्नराजः, द्वैमातुरः, गणाधिपः । |
| **सरस्वती**– ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती । | ब्राह्मी, भारती, भाषा, गीः, वाक्, वाणी, सरस्वती। |
| **पितरौ**– अम्बाथ जननी माता तातस्तु जनकः पिता । | अम्बा, जननी, माता, तातः, जनकः, पिता । |
| **देवः**– अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः । | अमराः, निर्जराः, देवाः, त्रिदशाः, विबुधाः, सुराः। |
| **पाषाणः**– अश्मा ग्रावा शिलाखण्डः पाषाणप्रस्तरोपलाः । | अश्मा, ग्रावा, शिलाखण्डः, पाषाणः,प्रस्तरः, उपलः। |
| **वृक्षः**– वृक्षो महीरुहः शाखी विटपी पादपस्तरुः । | वृक्षः, महीरुहः, शाखी, विटपी, पादपः, तरुः । |
| **पत्रम्**– पत्रं पलाशं छदनं दलं पर्णं छदः पुमान् । | पत्रम्, पलाशम्, छदनम्, दलम्, पर्णम्, छदः । |
| **पुष्पम्**– स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् । | सुमनाः, पुष्पम्, प्रसूनम्, कुसुमम्, सुमम् । |
| **पर्वतः**– महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः । | महीध्रः, शिखरी, क्ष्माभृत्, अहार्यधरः,पर्वतः । |
| **असुरः**– असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः । | असुराः,दैत्याः,दैतेयाः,दनुजाः, इन्द्रारयः, दानवाः। |
| **धनम्**– द्रव्यं वित्तं स्थापतेयं रिक्थमृक्थं धनं वसुः । | द्रव्यम्, वित्तम्, स्थापतेयम्, रिक्थम्, ऋक्थम्, धनम्, वसुः । |
| **जलम्**– उदकं जीवनं तोयं पानीयं सलिलं जलम् । | उदकम्, जीवनम्, तोयम्, पानीयम्, सलिलम्, जलम्। |
| **रात्रिः**– निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा । | निशा, निशीथिनी, रात्रिः, त्रियामा, क्षणदा, क्षपा । |
| **नदी**– तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी । | तरङ्गिणी, शैवलिनी, तटिनी, ह्रादिनी, धुनी । |
| **मित्रम्** – वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत् । | वयस्यः, स्निग्धः, सवयाः, मित्रम्, सखा, सुहृत् । |
| **गृहम्** – गृहं गेहोदवसितं वेश्म सद्म निकेतनम् । | गृहम्, गेहम्, उदवसितम्, वेश्म, सद्म, निकेतनम् । |
| **शीघ्रम्**– सत्वरं चपलं तूर्णमविलम्बितमाशु च । | सत्वरम्, चपलम्, तूर्णम्, अविलम्बितम्, आशु । |
| **सागरः**– उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः । | उदन्वान्, उदधिः, सिन्धुः, सरस्वान्, सागरः, अर्णवः। |
| **खगः**– खगे विहङ्गविहगविहङ्गमविहायसः । | खगः, विहङ्गः, विहगः, विहङ्गमः, विहायः । |
| **विद्वान्**– धीरो मनीषी ज्ञः प्राज्ञः सङ्ख्यावान् पण्डितः कविः। | धीरः, मनीषी, ज्ञः, प्राज्ञः, सङ्ख्यावान्, पण्डितः, कविः । |
| **वनम्**– अटव्यरण्यं विपिनं गहनं काननं वनम् । | अटवी, अरण्यम्, विपिनम्, गहनम्, काननम्, वनम्। |
| **मार्जारः**– ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् । | ओतुः, बिडालः, मार्जारः, वृषदंशकः, आखुभुक् । |
| **मनः**– चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः । | चित्तम्, चेतः, हृदयम्, स्वान्तम्, हृद्, मानसम्, मनः |
| **पवनः**– समीरमारुतमरुज्जगत्प्राणसमीरणाः । | समीरः, मारुतः, मरुत्, जगत्प्राणः, समीरणः । |
| **इन्द्रः**– इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः । | इन्द्रः, मरुत्वान्, मघवा, बिडौजाः, पाकशासनः । |
| **मुखम्**– वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् । | वक्त्रम्, आस्यम्, वदनम्, तुण्डम्, आननम्, लपनम्, मुखम् । |
| **हेम**– स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् । | स्वर्णम्, सुवर्णम्, कनकम्, हिरण्यम्, हेम, हाटकम् । |
| **आभरणम्**– अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् । | अलङ्कारः, आभरणम्, परिष्कारः, विभूषणम् । |
| **गङ्गा**– गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा । | गङ्गा, विष्णुपदी, जह्नुतनया, सुरनिम्नगा । |
| **केशवः**– दामोदरो हृषीकेशः केशवो माधवः स्वभूः । | दामोदरः, हृषीकेशः, केशवः, माधवः, स्वभूः । |
| **सूर्यः**– भानुर्हंसः सहस्रांशुस्तपनः सविता रविः । | भानुः, हंसः, सहस्रांशुः, तपनः, सविता, रविः । |

# अष्टमी कक्षा–मूल्यमापनम् ।

**प्रथमं/द्वितीयं सत्रम् – (१०० गुणाः)**

**सङ्कलित–मूल्यमापनम्–**

५० लेखी + १० मौखिकी ६० गुणाः ।

**आकारिक–मूल्यमापनम्–** ४० गुणाः ।

१) वर्गपरीक्षा– (प्रारूपानुसारम्) २० गुणाः ।

२) प्रकल्पः– (आशयाधारितम्) ५ गुणाः ।

३) उपक्रमः– (लेखनकौशल्याधारितम्) ५ गुणाः ।

४) लेखनपुस्तिका– ५ गुणाः ।

५) कक्षास्वाध्यायः– ५ गुणाः ।

**मौखिकी परीक्षा (१० गुणाः)**

- श्रवणम्– श्रुतलेखनम् (केवलं ४ शब्दाः) २ गुणौ ।
- वाचनम्– अपठितगद्यांशः २ गुणौ।
  (वर्णोच्चाराः, स्/ष्,न्/ण् भेदाः द्रष्टव्याः)
- भाषणम्– आशुभाषणम्/चित्रं दर्शयित्वा वर्णनम् २ गुणौ।
- कण्ठस्थीकरणम्– ४ गुणाः।

प्रार्थना, श्लोकपठनम्, तालिकापठनम् (नाम, सर्वनाम, क्रियापदम्) पञ्चदशवाक्यानि, सङ्ख्याः, घटी च।

## उपक्रमाः

१. १/४/६/१० (प.प., आ.प.) धातूनां तालिकाः लिखत । (लट्–लकारे, लङ्–लकारे)

२. अ/आ/इ/ई कारान्तशब्दानां तालिकाः लिखत ।

३. **वाक्यनिर्माणम्**– पञ्चदशवाक्यानि (लट्–लकारे, लङ्–लकारे) लिखत ।

४. **संवादलेखनम्**– (संवादद्वयम्) १०/२० वाक्यानि लिखत ।

५. **चित्रवर्णनम्**– ३ चित्राणि । (८–१० वाक्यानि लिखत ।)

६. **शब्दं लिखत**– अधोदत्तान् विषयान् अधिकृत्य शब्दसङ्ग्रहं कुरुत ।
   १. शाला २. गृहम् ३. ग्रन्थालयः ४. वस्त्रापणः ५. जन्मदिनम्
   ६. समुद्रतीरम् ७. वृक्षः ८. गणेशः ९. रेलस्थानकम्

७. **निबन्धपूर्तिः** – विषयम् अधिकृत्य ८–१० वाक्यानि पूरयत ।
   १. गजः २. मम माता ३. मम पिता ४. मम कुटुम्बम् ५. मम शिक्षिका
   ६. मम प्रियः खगः/पशुः । ७. मम विद्यालयः ८. मयूरः ९. आम्रवृक्षः १०. श्रीगणेशः

८. **अमरकोषपङ्क्तीः** लिखत ।

## प्रकल्पाः

**१. विषयानुसारं सुभाषितसङ्ग्रहं कुरुत ।**
१. विद्या २. परोपकारः ३. सज्जनाः ४. प्रहेलिकाः ५. गुणाः ६. स्वभावाः ७. संस्कृतभाषा ८. विशिष्ट–विभक्त्यन्तसुभाषितानि ९. आत्मनेपदीयक्रियापदयुक्तसुभाषितानि १०. लट्लकारयुक्तानि सुभाषितानि

**२. वस्तूनां प्रदर्शनीं योजयत ।**
१. पाकगृहम् २. शाला ३. शाकाः ४. प्राणिनः ५. खगाः ६. वर्णाः ७. आपणाः ८. निसर्गः ९. खाद्यपदार्थाः १०. यन्त्राणि

**३. विविधसंस्थानां बोधवाक्यानां सङ्ग्रहं कुरुत ।** यथा–सत्यमेव जयते । शं नो वरुणः ।

**४. दूरदर्शने 'संस्कृतवार्तावली' कार्यक्रमं दृष्ट्वा वार्तासङ्कलनं कुरुत ।**

**५. विविधप्रसङ्गेषु शुभेच्छापत्राणां प्रारूपं शिक्षकस्य साहाय्येन रचयत ।**



यथा – नववर्षस्य हार्दाः शुभाशयाः । शिक्षकदिननिमित्तम् अभिवादनम् ।

## प्रथम / द्वितीय–सत्रान्त–परीक्षा (५० गुणाः)

### सूचित–प्रारूपम् ।

| | | |
|---|---|---|
| प्र.१. | अ) चित्रं दृष्ट्वा नाम लिखत । (५ तः ४) (चित्रपदकोषतः ।) | २ |
| | आ) वर्णमाला–आधारेण। | २ |
| | इ) सङ्ख्या–आधारेण। (५ तः ४) | २ |
| | ई) समयबोधः (घटी–आधारेण) । (३ तः २) | २ |
| प्र. २. | शब्दज्ञान–आधारेण । (कृतिपत्रिकानिर्माणसमये शिक्षकाः विविधकृतीनाम् उपयोगं कर्तुम् अर्हन्ति । यथा (१) चतुर्थपदं लिखत । (२) मञ्जूषातः शब्दान् चिनुत । (३) शब्दयुग्मं चिनुत । (४) मेलनम् । (५) जालरेखाचित्रं पूरयत । (६) समूहेतरपदं चिनुत–केवलं समानार्थकपदानां कृते ।) | |
| | अ) समानार्थकशब्दाः । (५ तः ४) | २ |
| | आ) विरुद्धार्थकशब्दाः ।(५ तः ४) | २ |
| | इ) विशेषणं विशेष्यं च । | २ |
| प्र. ३. | अ) श्लोकपूर्तिं कुरुत । (४ तः २) | ४ |
| | आ) एकवाक्येन उत्तरं लिखत । (गद्यम्/पद्यम्) (४ तः २) | २ |
| प्र. ४ | अ) (क) माध्यमभाषया सरलार्थं लिखत । (गद्यम्) | ४ |
| | प्रथमं सत्रम् – कान्यपि ६ सरलानि वाक्यानि । (६ तः ४) (प्रथमः घटकः द्वितीयः घटकः च ।) | |
| | द्वितीयं सत्रम् – परिच्छेदद्वयं प्रष्टव्यम् । प्रतिपरिच्छेदं ४/५ वाक्यानि । (पाठ क्र. १३, १६, १८, १९) | |
| | (ख) माध्यमभाषया सरलार्थं लिखत । (पद्यम्) (२ तः १) | २ |
| | प्रथमं सत्रम् – पद्यम् ९ । द्वितीयं सत्रम् – पद्यम् १२, १७ । | |
| | आ) माध्यमभाषया उत्तरं लिखत । (गद्यम्/पद्यम्) (३ तः २) | ४ |
| प्र. ५. | अ) पृथक् कुरुत । (तालिकारूपेण) नाम, सर्वनाम, क्रियापदम्, विशेषणम्। (६ तः ४) | २ |
| | आ) अधोदत्तेषु केवलं त्रयाणां प्रश्नानाम् उत्तराणि लिखत । | ६ |
| | १) योग्यं विभक्तिरूपं लिखत । | |
| | २) अव्ययस्य उपयोगं कृत्वा वाक्यं लिखत । (अत्र, ह्यः, पुरतः ...) | |
| | ३) शुद्धं शब्दं/वाक्यं चिनुत । | |
| | ४) सूचनानुसारं वाक्यपरिवर्तनं कुरुत । (वचनं/पुरुषः/कालपरिवर्तनम्/प्रश्ननिर्माणम्) | |
| प्र. ६. | अ) अपठितं गद्यम् । (गद्यांशं पठित्वा प्रश्नान् उत्तरत ।) | ४ |
| | १) एकवाक्येन उत्तरत । (२ तः १) | |
| | २) गद्यांशतः समानार्थकशब्दं/विरुद्धार्थकशब्दं/विशेषणं/विभक्त्यन्तं पदं चिनुत । (२ तः १) | |
| | ३) जालरेखाचित्रं/स्तम्भं पूरयत । | |
| | आ) अपठितं पद्यम् । (पद्यांशं पठित्वा प्रश्नान् उत्तरत ।) | २ |
| | १) एकवाक्येन उत्तरत । (२ तः १) | |
| | २) पद्यांशतः समानार्थकशब्दं/विरुद्धार्थकशब्दं/विशेषणं/विभक्त्यन्तं पदं चिनुत । (२ तः १) | |
| प्र. ७ | अ) उचितं पर्यायं चित्वा निबन्धं लिखत । अथवा | |
| | शब्दमञ्जूषायाः साहाय्येन चित्रवर्णनं/संवादं पूरयत । (केवलं ४ वाक्यानि) | ४ |
| | आ) अनुवादं लिखत । (संस्कृतेन अनुवादः ।) | २ |

प्र.१. (अ) चित्रं दृष्ट्वा नाम लिखत । (केवलम् ४) २

१  २  ३  ४  ५ 

(आ) १) योग्यम् उत्तरं चिनुत । १

(क) क् ख् ग् घ् -- । (ङ्/ञ्) (ख) 'च्' इति वर्ण: ________। (ओष्ठ्य:/तालव्य:)

२) वर्णविग्रहं कुरुत । वज्रप्रहारात् – ________ । १


(इ) अक्षरै: अङ्कै: वा सङ्ख्या: लिखत । (केवलम् ४) २

१) २ ________ । २) नवदश ______ । ३) ३६ ________ ।


४) षोडश _____ । ५) २८ ______ ।

(ई) समयं दर्शयत लिखत वा । (केवलम् २) २

१) सार्धषड्वादनम्



२) सपादसप्तवादनम्



३) ________



प्र.२. (अ) समानार्थकशब्दान् लिखत । (केवलम् ४) २

१) शोभते, २) वनम्, ३) मनुष्य:, ४) पुष्पम्, ५) गच्छति

मञ्जूषा – (कुसुमम्, मानव:, राजते, याति, काननम्)

(आ) विरुद्धार्थक–शब्दयुग्मं चिनुत । (केवलम् ४) २

क्षय:, मूर्ख:, आनयति, सुखम्, पण्डित:, अक्षय:, कातर:, नयति, धीर:, दु:खम्

(इ) मेलनं कुरुत । २

| 'अ' | 'ब' |
|---|---|
| १) समाना: | अ) अश्व: । |
| २) लघुभारा | ब) विचारा: । |
| ३) वर्णसम्पन्नम् | क) नलिका । |
| ४) क्षीण: | ड) कुसुमम्। |

प्र.३. (अ) श्लोकपूर्तिं कुरुत । (केवलम् २) ४

१) अमन्त्रमक्षरं .................दुर्लभ: ।। २) शतेषु ................. न वा ।।

३) न भूतपूर्वं ................. विपरीतबुद्धि: ।। ४) वनस्पते ................. विनश्यति ।।

(आ ) एकवाक्येन उत्तरं लिखत । (केवलम् २) २

१) देव: कुत्र वर्तते ? २) पुरा सर्वे पर्वता: कीदृशा: ?

३) छात्रा कुत्र उपाविशत् ? ४) राजा कुत्र पूज्यते ?

प्र. ४ (अ) **(क) माध्यमभाषया गद्यांशस्य सरलार्थं लिखत । (केवलम् १)** ४

१) बालिका अवदत् '' एतद् रेलयानम् अस्माकं कृते अस्ति । एतत् राष्ट्रस्य सम्पत्तिः खलु। तस्य सुरक्षणम् अस्माकम् आद्यं कर्तव्यम् एव । अहं तदेव करोमि ।'' बालिकायाः एतद् उत्तरम् अतीव बोधप्रदम्।

२) एकस्मिन् दिने भोजनवेलायां सर्वे गोपाः कृष्णं परितः उपाविशन् । देवकीनन्दनः गोपबालान् अपृच्छत्। ''अद्य भोजनार्थं किम् आनीतम् ?'' इति । तदा प्रथमः अवदत्, ''मम समीपे दध्योदनं वर्तते ।'' अपरः अभाषत, ''मम समीपे पृथुकाः ।''

**(ख) माध्यमभाषया पद्यांशस्य सरलार्थं लिखत । (केवलम् १)** २

१) अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।

२) अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथा वै परिवर्तते ।।

**(आ) माध्यमभाषया उत्तरं लिखत । (केवलम् २)** ४

१) ''न शोभते क्रियाहीनं मधुरं वचनं तथा'' । एतद् वाक्यं स्वभाषया स्पष्टीकुरुत ।

२) 'वाग्भूषणं भूषणम्' एतां सूक्तिं स्वभाषया स्पष्टीकुरुत ।

३) उपकारस्य स्मरणं मैनाकेन कथं कृतम्?

प्र.५. **(अ) पृथक् कुरुत । (केवलम् ४)** २

| नाम | सर्वनाम | क्रियापदम् | विशेषणम् |
|---|---|---|---|
| | | | |

मञ्जूषा– (पवनदेवः, चलति, अगच्छत्, शूरः, सः, गोपालः)

**(आ) अधोदत्तेषु केवलं त्रयाणां प्रश्नानाम् उत्तराणि लिखत ।** ६

**(क) योग्यविभक्तिरूपं लिखत । (केवलम् २)**

१) जनकः (अस्मद्) न कदापि क्रुध्यति । २) अहं (देवालय) गच्छामि ।

३) अग्रजा (अनुजा) स्निह्यति ।

**(ख) अव्ययस्य उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (केवलम् २)**

१) अत्र २) उभयतः ३) नमः

**(ग) शुद्धं शब्दं चिनुत । (केवलम् २)**

१) दुग्धम्, दूग्धम् २) हरितः, हरीतः ३) चिह्नम्, चिन्हम् ४) कुन्चिका, कुञ्चिका

**(घ) सूचनानुसारं वाक्यपरिवर्तनं कुरुत । (केवलं २ वाक्ये)**

१) दशरथस्य पुत्रः रामः । (अधोरेखितं शब्दम् अनुसृत्य प्रश्ननिर्माणं कुरुत । )

२) त्वं मित्राय लेखनीं यच्छसि। (त्वम् इत्यस्य स्थाने अहम् इत्यस्य उपयोगं कुरुत ।)

३) शिक्षकः सुधाखण्डेन लिखति । (बहुवचनं कुरुत।)

**प्र.६. (अ) गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** ४

उद्याने पुष्पफलयुता: वृक्षा: लता: च विराजन्ते । बहव: पशव: विहगा: अपि अत्र पालिता: रक्षिता: च सन्ति । सिंहा:, व्याघ्रा:, जम्बूका:, मृगा: इति विविधा: पशव: तथा च मयूर:, शुक:, सारिका, चटका इति अन्ये विविधा: खगा: अत्र सन्ति ।

क) एकवाक्येन उत्तरत । (केवलम् एकम्) (१) उद्याने के विराजन्ते? (२) के पालिता: रक्षिता: च ?

ख) केवलम् एकं लिखत । (१) गद्यांशत: समानार्थकं पदं चिनुत । खगा: = ______।

(२) गद्यांशत: विरुद्धार्थकं पदं चिनुत । अल्पा: × ______।

ग) गद्यांशे आगतानि नामानि लिखत ।

| | |
|---|---|
| पशव: | |
| खगा: | |

**(आ) पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत । (केवलं २)** २

आकाशात् पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कार: केशवं प्रति गच्छति ।।

**(क) एकवाक्येन उत्तरत । (केवलं १)**

१) आकाशात् किम् पतति? २) केशवं प्रति किं गच्छति?

**(ख) पद्यांशत: पञ्चमीविभक्त्यन्तं पदं चिनुत ।**

**(ग) समूहेतरं पदं चिनुत ।** सागर:, उदधि:, उदकम्, समुद्र:

**प्र.७. (अ) शब्दमञ्जूषाया: साहाय्येन चित्रवर्णनं पूरयत ।** ४




१) रेलस्थानकस्य पुरत: ______ भारं वहन्ति ।

२) ______ बहि: एक: जन: उपविशति ।

३) आरक्षणस्य कृते द्वौ जनौ ______ ।

४) एतत् ______ नगरस्य रेलस्थानकम् ।

मञ्जूषा – (तिष्ठत:, सांगली, प्रतीक्षालयात्, भारवाहका:)

**अथवा** उचितं पर्यायं चित्वा निबन्धं लिखत । **मयूर:** ।


मयूर: वर्षाकाले (नृत्यामि/नृत्यति) । तस्य नृत्यम् अतीव (रमणीयं/तापकारकं) वर्तते । जलपूर्णं मेघं (आकाशात्/आकाशे) दृष्ट्वा स: नृत्यति । स: शारदादेव्या: वाहनम् (अस्ति/नास्ति) । स: राष्ट्रिय: खग: इति प्रसिद्ध:।

**(आ) अधोदत्तानां वाक्यानां संस्कृतमाध्यमेन अनुवादं कुरुत । (केवलम् २)** २

१) आकाशात मेघ आहेत. आकाश में मेघ है । There are clouds in the sky.


२) कावळ्याचा रंग काळा आहे. कौओ का रंग काला है । The colour of crow is black.


३) दोन मुले शाळेत जात आहेत. दो छात्र विद्यालयमें जा रहे है । Two students are going to school.


































- पाठ्यपुस्तक मंडळाची वैशिष्ट्यपूर्ण पाठ्येत्तर प्रकाशने.
- नामवंत लेखक, कवी, विचारवंत यांच्या साहित्याचा समावेश.
- शालेय स्तरावर पूरक वाचनासाठी उपयुक्त.

पुस्तक मागणीसाठी www.ebalbharati.in, www.balbharati.in संकेत स्थळावर भेट द्या.

**साहित्य पाठ्यपुस्तक मंडळाच्या विभागीय भांडारांमध्ये विक्रीसाठी उपलब्ध आहे.**

ebalbharati

विभागीय भांडारे संपर्क क्रमांक : पुणे - ☎ २५६५९४६५, कोल्हापूर- ☎ २४६८५७६, मुंबई (गोरेगाव) - ☎ २८७७१८४२, पनवेल - ☎ २७४६२६४६५, नाशिक - ☎ २३९१५११, औरंगाबाद - ☎ २३३२१७१, नागपूर - ☎ २५४७७१६/२५२३०७८, लातूर - ☎ २२०९३०, अमरावती - ☎ २५३०९६५

महाराष्ट्रराज्य-पाठ्यपुस्तक-निर्मितिः तथा
अभ्यासक्रम-संशोधन-मण्डलम्, पुणे-४

संस्कृत आमोद इयत्ता आठवी (संपूर्ण) ₹ ३९.००

